तृप्तिदीपाख्यं प्रकरणम् आरभमाणः श्रीभारतीतीर्थगुरुः तस्य श्रुतिव्याख्यानरूपत्वात् तद्व्याख्येयां श्रुतिम् आदौ पठति –

आत्मानं चेत् विजानीयात् अयम् अस्मीति पूरुषः।

किम् इच्छन् कस्य कामाय शरीरम् अनुसंज्वरेत्॥ १॥

आत्मानं चेत् इति॥

इदानीं चिकीर्षितविचारं तत्फलं च दर्शयति –

अस्याः श्रुतेः अभिप्रायः सम्यक् अत्र विचार्यते।

जीवन्मुक्तस्य या तृप्तिः सा तेन विशदायते॥ २॥

अस्याः इति। अत्र तृप्तिदीपाख्ये ग्रन्थे अस्याः आत्मानं चेत् बृ।४।४।१२ इत्यादिकायाः श्रुतेः अभिप्रायः तात्पर्यं संयक् विचार्यते। तेन अभिप्रायविचारेण जीवन्मुक्तस्य श्रुतिप्रसिद्धा या तृप्तिः सा विशदायते स्पष्टीभवति।२

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।

आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्॥ पराशरपुराणं अध्याय १८

इति व्याख्यानलक्षणस्य उक्तस्त्वात् पूरुषः इति पदस्य अर्थमभिधातुं तदुपोद्घातत्वेन सृष्टिं संक्षिप्य दर्शयति–

मायाभासेन जीवेशौ करोति इति श्रुतत्वतः।

कल्पितौ एव जीवेशौ ताभ्यां सर्वं प्रकल्पितम्॥ ३॥

मायाभासेनेति। प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थं अर्थान्तरवर्णम् उपोद्घातः। अत्र मायाशब्देन चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता सत्वरजस्तमोगुणात्मिका जगदुपादानभूता प्रकृतिरुच्यते। सा च सत्वगुणस्य शुद्धयविशुद्धिभ्यां द्विधा विद्यमाना क्रमेण मायाचाविद्या च भवति।तयोः मायाऽविद्ययोः प्रतिबिम्बितं ब्रह्मचैतन्यमेव ईश्वरो जीवश्च इत्युच्यते। तदिदं तत्त्वविवेकाख्यये ग्रन्थे श्रीमद्विद्यारण्यगुरुभिः निरूपितम् पञ्च १ १५-१७

चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता।
तमोरजस्सत्वगुणा प्रकृतिर्द्विविधा च सा॥

इति इममेवार्थण् मनसि निधाय जीवेशावाभासेन करोति माया च अविद्या च स्चयमेव भवति नृ उ ता ९ इति श्रुतिरपि प्रवृत्ता। अतो जीवेश्वरयोः मायाकल्पितत्वं अन्यत् कृत्स्नं जगत् ताभ्यमेव कल्पितम्॥३॥

ईक्षणाादि-प्रवेशान्ता सृष्टिरीशेन कल्पिता।
जाग्रतादि-विमोक्षान्तः संसारो जीवकल्पितः॥ ४॥

भ्रमाधिष्ठान-भूतात्मा कूटस्थ असङ्ग चित् वपुः।
अन्यः अन्यात् अध्यासतः असङ्ग धी स्थ जीवः अत्र पूरुषः॥ ५॥

साधिष्ठानः विमोक्शादौ जीवः अधिक्रियते न तु।
केवलः निरधिष्ठान विभ्रान्तेः क्वापि असिद्धितः॥ ६॥

अधिष्ठान अंश संयुक्तं भ्रम अंशम् अवलम्बते।

यदा तदा अहं संसारी इति एवं जीवः अभिमन्यते॥ ७॥

भ्रम अंशस्य तिरस्कारात् अधिष्ठान प्रधानता।

यदा तदा चित् आत्मा अहम् असङ्गः अस्मि इति बुद्धयते॥ ८॥

नासङ्गे अहंकृतिर्युक्ता कथम् अस्मीति चेत् शृणु।

एको मुख्यो द्वौ अमुख्यौ इत्यर्थस्त्रिविधोऽहमः॥ ९॥

असङ्गे चिदात्मनि विषये अहंप्रत्ययः न युज्यते यतः अतः कथम् अहम् अस्मीति जानीयात्। न कथम् अपि इत्यर्थः। मुख्यया वृत्या अहंप्रत्ययविषयत्वाभावे अपि लक्षणया तदस्तीति विवक्षुः अहं-शब्दार्थं तावद् विभजते - शृणु इति। अहमोऽहंशब्दस्य इत्यर्थः॥ ९॥

अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः।

एकीभूय भवेद् मुख्यः तत्र मूढैः प्रयुज्यते॥ १०॥

कूटस्थ-चिदाभासयोः स्वरूपम् अन्योन्याध्यासेन ऐक्यं प्राप्तम् अहं शब्दस्य वाच्यत्वेन मुख्यः अर्थः भवति। अस्य कुतः मुख्यत्वम् इत्यतः आह तत्र मूढैः इति। यतः इति अध्याहारः। तत्र तस्मिन् अविविक्त-कूटस्थ-चिदाभासयोः स्वरूपे यतः विवेक-ज्ञानशून्यैः सर्वैः अपि अहं-शब्दः प्रयुज्यते। अतः अस्य मुख्यत्वम् इत्यर्थः॥ १०॥

इदानीम् अमुख्यौ द्वौ दर्शयति -

पृथग् आभास-कूटस्थौ अमुख्यौ तत्र तत्त्ववित्।

पर्यायेण प्रयुङ्क्तेऽहं-शब्दं लोके च वैदिके ॥११॥

पृथग् इति। आभास-कूटस्थौ प्रत्येकम् अहं-शब्द-अर्थत्वेन यदा विवक्षितौ तदा अमुख्यर्थौ बह्वतः। अनयोः अमुख्यत्वे कारनम् आह - तत्र तत्त्ववित् ई। अत्रापि यतः इति अध्याहारः। तत्त्ववित् यतः तत्र तयोः कूतस्थ-चिदाभासयोः अहं शब्दं लोक लौकिके वैदिके वैदिकव्यवहारे च पर्यायेण प्रयुङ्क्ते इति योजना। अयं भावः - चिदाभास-कूतस्थयोह् अविविक्तरूपस्य सार्वजनीन-व्यवहार-विषयत्वाद् मुख्यार्थत्वम् विविक्तरूपस्य तु कतिपयजनैः कदाचिद् एव व्यवह्रियमाणत्वात् मुख्यार्थवम् इति ॥११॥

पर्यायेण पयुङ्क्ते इति उक्तमेवार्थं प्रपञ्चयति प्रतिपत्ति-सौकर्याय श्लोकद्वयेन -

लौकिकव्यवहारेऽहं गच्छामीत्यादिके बुधः।

विविच्यैव चिदाभासं कुटस्थात् तं विवक्षति ॥१२॥

बुधः विद्वान् अहं गच्छामि इत्यादि-लौकिक-व्यवहारे कूटस्थात् चिदाभासं विविच्य तमेव अहं शब्देन विवक्षति वक्तुम् इच्छति ॥१२॥

असङ्गोऽहं चिदात्माहम् इति शास्त्रीय-दृष्टितः।

अहं-शब्दं प्रयुङ्क्तेयं कूटस्थे केवले बुधः ॥१३॥

ज्ञानिताज्ञानिते त्वात्माभासस्यैव न चात्मनः।

तथा च कथम् आभासः कूटस्थोऽस्मीति बुध्यताम्॥ १४॥

तस्य कूटस्थान्यत्वम् एव असिद्धम् इति परिहरति -

नायं दोषश्चिदाभासः कूटस्थैकस्वभाववान्।

आभासत्वस्य मिथ्यात्वात् कूटस्थत्वावशेषणात्॥ १५॥

नायम् इति। तत्र दोषाभावे उपपत्तिम् आह - आभासत्वस्य इति। यथा दर्पणे प्रतीयमानस्य मुखाभासस्य ग्रीवास्थं मुखम् एव तत्वम् तद्वदिति भावः॥ १५॥

ननु चिदाभासस्य मिथ्यात्वे तदाश्रितं कूटस्थोस्मि इति ज्ञानम् अपि मिथ्या स्यादिति शङ्कते -

कूटस्थोऽस्मीति बोधोऽपि मिथ्या चेन्नेति को वदेत्।

न हि सत्यतयाभीष्टं रज्जुसर्पविसर्पणम्॥१६॥

कूटस्थ इति। कूटस्थ-स्वरूपातिरिक्तस्य कृत्स्नस्यापि मिथ्यात्वाभ्युपगमात् तन्मिथ्यात्वम् अस्माकम् इष्टमेवेति परिहरति - नेति को वदेत् इति। उक्तमर्थं दृष्टान्तेन स्पष्टयति - न हि इति। रज्ज्वां कल्पितस्य सर्पस्य गत्यादिकम् अपि प्रतीयमानं वास्तवं नाङ्गीक्रियते यथा तद्वद् रज्जुसर्पोऽपगतः इति दृष्टव्यवहारोऽपि यथा न तथ्यः तद्वद् इति भावः॥ १६॥

ज्ञानस्य मिथ्यात्वे तेन संसारनिवृत्तिर्न स्याद् इत्याशङ्क्य निवर्त्यस्य संसारस्यापि तथात्वात् तन्निवृत्तिः उपपद्यते स्वप्न-व्याघ्रदर्शनेन निद्रा-निवृत्तिवद् इत्यभिप्रायेणाह -

तादृशेनापि बोधेन संसारो हि निवर्तते ।
यक्षानुरूपो हि बलिः इत्याहुर्लौकिका जनाः ॥१७॥

तादृशेन असत्येनापि इति । तत्र संसारस्य मिथ्या-ज्ञाननिवर्त्यत्वे यादृशो यक्षस्तादृशो बलिः इति लौकिकगाथां संवादयति - यक्षेति ॥१७॥

उपपादितम् अर्थम् उपसंहरति -

तस्माद् आभासपुरुषः स कूटस्थो विविच्य तम् ।
कूटस्थोऽस्मीति विज्ञातुम् अर्हतीति अभ्याच्छ्रुतिः ॥१८॥

यस्मात् कूटस्थ एव चिदाभासस्य निजं स्वरूपं तस्मात् पुरुष-शब्दवाच्यः कूटस्थेन सहितः चिदाभासः तं कूटस्थं मिथ्याभूतात् स्वस्माद् विविच्य लक्षणया कूटस्थोऽहम् अस्मि इति अवगन्तुं शक्नोति इत्यभिप्रायेण श्रुतिः अस्मीत्युक्तवती इत्यर्थः ॥१८॥

एवं पुरुषोऽस्मि इति पदद्वयप्रयोगाभिप्रायं अभिधाय अयम् इति पदप्रयोगाभिप्रायम् आह -

असन्दिग्धाऽविपर्यस्त-बोधो देहात्मनीक्ष्यते ।

तद्वद् अत्रेति निर्णेतुम् अयम् इत्यभिधीयते ॥ १९ ॥

लौकिकानां प्रसिद्धे देहरूपे आत्मनि संशयविपर्यय-रहितः अयम् अस्मीति बोधो यद्वद् उपलभ्यते अत्र प्रत्यगात्मनि विषये त्वद्वत् तथाविधं ज्ञानं मुक्तिसिद्धये संपाद्यम् इति निर्णेतुं अयम् इत्यभिधीयते श्रुत्या इति शेषः ॥१९॥

ईदृशस्यैव बोधस्य मोक्ष-साधनत्वे च आचार्य-वाक्यं संवादयति -

देहात्म-ज्ञानवद् ज्ञानं देहात्म-ज्ञान-बाधकम् ।
आत्मन्येव भवेद् यस्य स नेच्छन्नपि मुच्यते ॥२० ॥

अहं मनुष्यः इति देहात्मविषयः दृढ-प्रत्ययः यथा एवं प्रत्यगात्मन्येव देह एव आत्मा इत्येवं देहात्मत्व-ज्ञानापबाधनेन ब्रह्माहम् अस्मि इति ज्ञानं यस्य जायते स विद्वान् न इच्छन्नपि मोक्षेच्छारहितोऽपि मुच्यते संसार-हेतोः अज्ञानस्य ज्ञानेन अपबाधितत्वाद् इति भावः ॥२० ॥

अयम् इति पद-प्रयोगस्य अभिप्रायान्तरं शङ्कते -

अयम् इत्यपरोक्षत्वम् उच्यते चेद् तदुच्यताम् ।
स्वयंप्रकाश-चैतन्यम् अपरोक्षं सदा यतः ॥२१ ॥

यथा अयं घटः इत्यादि-प्रयोगेषु इदमा निर्दिष्टस्य वस्तुनः आपरोक्ष्यं दृष्टं तथा अयम् अस्मि इत्यत्रापि इति भावः । तदपि अस्माकम् इष्टमेव एव इत्याह - तदुच्यताम् इति । कुतः इत्यत आह - स्वयम् इति । साधनान्तर-निरपेक्षतया

अवभासमानं चैतन्यं व्यवधायकाभावात् नित्यम् अपरोक्षम् इत्यस्माभिः अभ्युपेतत्वाद् इत्यर्थः ॥२१॥

ननु आत्मनः स्वप्रकाश-चिद्रूपत्वेन नित्यापरोक्षत्वाभ्युपगमे अयम् इति पदप्रयोगस्य अभिप्रायवर्णन-अङ्गीकारबलाद् आगतं आत्मनः परोक्षविषयत्वं पूर्वोक्तं ज्ञानाज्ञानाश्रय-विषयत्वं वा अनुपपन्नं स्याद् इत्याशङ्क्य दशमे इव सर्वम् उपपत्स्यते इत्याह -

परोक्षम् अपरोक्षं च ज्ञानमज्ञानमित्यदः ।
नित्यापरोक्षरूपेऽपि द्वयं स्याद् दशमे यथा ॥२२॥

परोक्षम् अपरोक्षं च इत्युक्तं युगलं ज्ञानमज्ञानमित्यपरं इदं द्वयं नित्यापरोक्षरूपेऽप्यात्मनि दशमे इव स्याद् इत्यर्थः ॥२२॥

दृष्टान्तं व्युत्पादयति -

नवसंख्याहृतज्ञानो दशमो विभ्रमात् तदा ।
न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान् नव ॥२३॥

परिगणनीयपुरुषनिष्ठया नव-संख्यया अपहृतविवेकज्ञानः दशमः तदा तान् परिगणनीयान् नव-संख्याकान् वीक्षमाणः अपि सम्यक् पश्यन् अपि भ्रान्त्या गणनाकर्तारं स्वात्मानं दशमोऽहमस्मि इति न वेत्ति इत्यर्थः ॥२३॥

एवं दशमेऽज्ञानं प्रदर्श्य तत्कार्यम् आवरणं दर्शयति -

न भाति नास्ति दशम इति स्वं दशमं तदा ।

मत्वा वक्ति तदज्ञान-कृतम् आवरणं विदुः ॥२४ ॥

तदा दशमः दश मिमीते असौ दशमः स्वं दशमं सन्तं दशमो न भाति नास्ति इति मत्वा वक्ति । अस्य व्यवहारस्य यत्कारणं तदज्ञानकृतम् अज्ञानकार्यमावरणं विदुः बुधाः इति शेषः ॥२४ ॥

अज्ञानस्यैव कार्यविशेष-विक्षेपं दर्शयति -

नद्यां ममार दशम इति शोचन् प्ररोदिति ।

अज्ञानकृत-विक्षेपं रोदनादिं विदुर्बुधाः ॥२५ ॥

दशमस्य असत्वांश-निवर्तकं परोक्षज्ञानम् आह -

न मृतो दशमोऽस्तीति श्रुत्वा आप्तवचनं तदा ।

परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत् ॥२६ ॥

तस्यैव अभानांश-निवर्तकं अपरोक्षज्ञानं दर्शयति -

त्वमेव दशमोऽस्तीति गणयित्वा प्रदर्शितः ।

अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति ॥२७ ॥

स्वेन परिगणितैः नवभिः सह स्वात्मानं गणयित्वा त्वमेव दशमोऽसि इति प्रदर्शितः अहं दशमोऽस्मि इति अपरोक्षतया ज्ञात्वा हर्षं प्राप्नोति रोदनं त्यजति ॥२८ ॥

एवं दृष्टान्तभूते दशमे प्रदर्शितम् अवस्थासप्तकम् अनूद्य दार्ष्टान्तिके आत्मन्यपि तद् योजनीयम् इत्याह -

अज्ञानावृतिविक्षेप-द्विविधज्ञानतृप्तयः ।
शोकपगम इत्येते योजनीयाश्चिदात्मनि ॥२८॥

अज्ञानं च आवृतिश्च विक्षेपश्च द्विविधं ज्ञानं च तृप्तिश्च इति द्वन्द्वः समासः ॥२८॥

तत्र आत्मनि अज्ञानादिकं क्रमेण दर्शयति संसारासक्त इत्यादिना चतुर्भिः -

संसारासक्त-चित्तः सन् चिदाभासः कदाचन ।
स्वयंप्रकाशकूटस्थं स्वतत्वं नैव वेत्त्ययम् ॥२९॥

अयं चिदाभासः विषय-सम्पादनादि-ध्यानासक्त-चित्तः सन् कदाचन श्रुति-विचारात् पूर्वं कदापि स्वतत्त्वम् स्वस्य निजं रूपं स्वप्रकाश-चिद्रूपं कूटस्थं प्रत्यगात्मानं नैव वेत्ति न जानाति यत् तद् अज्ञानम् ॥२९॥

न भाति नास्ति कूटस्थ इति वक्ति प्रसङ्गतः ।
कर्ता भोक्ताऽहम् अस्मीति विक्षेपं प्रतिपद्यते ॥३०॥

चिदात्मविषये प्रसङ्गे जाते कूटस्थो नास्ति न भाति इति मत्वा ब्रूते इदम् अज्ञान-कार्यम् आवरणं कूटस्थ-असत्व-अभान-अभिधानवत्-कर्तृत्वादिकं

आत्मनि आरोपयति। अस्य आरोपस्य हेतुः देहद्वययुतः चिदाभासः विक्षेपः ॥३०॥

अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्तया।
पश्चात् कूटस्थ एवास्मि इत्येवं वेत्ति विचारतः ॥३१॥

परेण बोधितः कूटस्थोऽस्ति इति जानाति इदं परोक्षज्ञानम्। श्रवणादि-परिपाकवशात् कूटस्थोऽहमेवास्मि इति जानाति इदम् अपरोक्ष-ज्ञानम्। कर्ता भोक्तेत्येवमादि शोक-जातं प्रमुञ्चति।

कृतं कृत्यं प्रापणीयं प्राप्तम् इत्येव तुष्यति ॥३२॥

कूटस्थ-असङ्ग-आत्मज्ञानानन्तरं कर्तृत्वादि-शोकजातं त्यजति इति यद् अयं शोकापगमः। कृत्यम् कर्तव्यजातं कृतं निष्पादितं प्रापणीयं फलजातं प्राप्तं लब्धम् इति तुष्यति। इयं तृप्तिः इत्यर्थः ॥३२॥

दार्ष्टान्तिकेऽपि अयुक्तम् अवस्था-सप्तकम् अनुवदति -

अज्ञानमावृतिस्तद्वद् विक्षेपश्च परोक्षधीः।
अपरोक्षमतिः शोक-मोक्षस्तृप्तिर्निरङ्कुशा ॥३३॥

ननु उक्तावस्था-सप्तकस्य आत्मधर्मत्व-अङ्गीकारे कूटस्थत्वं व्याहन्येत इत्याशङ्क्य एताः सप्तावस्थाः चिदाभासस्यैव न कूटस्थस्य इत्याह -

सप्तावस्था इमा सन्ति चिदाभासस्य तास्विमौ।

बन्ध-मोक्षौ स्थितौ तत्र तिस्रो बन्धकृतः स्मृताः ॥३४॥

सर्वं वाक्यं सावधारणम् इति न्यायेन चिदाभासस्य एव इति अवगम्यते न कूटस्थस्य। सप्तावस्थानाम् आसाम् अत्र उपन्यासः वृथा इत्याशङ्क्य न वृथात्वं बन्ध-मोक्षकारित्व-द्योतन-फलत्वाद् उपन्यासस्य इत्यभिप्रायेण आह - तास्विमौ इति। किम् आसां सप्तानामपि अविशेषेण बन्ध-मोक्षकारित्वं न इत्याह - तत्र इति। अज्ञान-आवरण-विक्षेप-रूपास्तिस्रः इत्यर्थः ॥३४॥

आसां बन्धकारित्व-दर्शनाय तिसृणामपि स्वरूपं प्रत्येकं कार्यप्रदर्शनेन स्पष्टीचिकीर्षुः अज्ञानस्य स्वरूपं तावद् दर्शयति -

न जानामीत्युदासीन-व्यवहारस्य कारणम्।
विचार-प्रागभावेन युक्तम् अज्ञानम् ईरितम् ॥३५॥

आत्म-तत्व-विचार-प्रागभाव-सहितम् उदासीन-व्यवहारस्य कारणं न जानामि इति अनुभूयमानं अज्ञानम् ईरितम् इत्यर्थः ॥३५॥

आवृत्तिस्वरूपं तत्कार्यं च दर्शयति -

अमार्गेण विचार्याथ नास्ति नो भाति चेत्यसौ।
विपरीतव्यवहृतिः आवृतेः कार्यम् इष्यते ॥३६॥

शास्त्रोक्तं प्रकारम् अतिलङ्घ्य केवलं तर्केण विचार्य अनन्तरं कूटस्थो नास्ति न भाति इत्येवंरूपो विपरीतव्यवहार आवरणकार्यम् इत्यर्थः ॥३६॥

विक्षेपस्य स्वरूपं तत्कार्यं च दर्शयति –

देहद्वयचिदाभासरूपो विक्षेप ईरितः।

कर्तृत्वाद्यखिलः शोकः संसाराख्योऽस्य बन्धकः ॥३७॥

स्थूलसूक्ष्माख्यशरीरद्वयसहितः चिदाभासः एव विक्षेपः बन्धको बन्धहेतुः संसाराख्यः कर्तृत्वाद्यखिलः शोकः अस्य चिदाभासस्य कार्यम् इति शेषः। कर्तृत्वादीत्यत्र आदिशब्देन प्रमातृत्वादयो गृह्यन्ते ॥३७॥

ननु सप्तावस्थाः चिदाभासस्य इत्युक्तम् अनुपपन्नम्। अज्ञानावरणयोः विक्षेपोत्पत्तेः पुरा स्थितत्वात् चिदाभासस्य च विक्षेपान्तःपातित्वात् तदवस्थात्वानुपपत्तेः इत्याशङ्क्य आह –

अज्ञानम् आवृतिश्चैते विक्षेपात् प्राक् प्रसिद्धयतः।

यद्यपि यथाप्यवस्थे ते विक्षेपस्यैव नात्मनः ॥३८॥

अनयोः अज्ञानावरणयोः विक्षेपात् पुरा स्थितत्वेऽपि नात्मावस्थत्वम् तस्यासङ्गत्वेन अवस्थावत्वानुपपत्तेः। अतः परिशेषात् चिदाभासावस्थात्वमेव तयोर्वक्तव्यम् इति भावः ॥३८॥

ननु अवस्थावतो विक्षेपस्य तदानीम् अभावात् तदवस्थात्वाभिधानम् अनुपपन्नम् इत्याशङ्क्य विक्षेपाभावेऽपि तत्संस्कारस्य तदानीं सत्त्वात् विक्षेपावस्थात्वाभिधानं न विरुध्यते इत्याह –

विक्षेपोत्पत्तितः पूर्वम् अपि विक्षेपसंस्कृतिः ।

अस्त्येव तदवस्थात्वम् अविरुद्धं ततस्तयोः ॥३९॥

ततः कारणात्तयोः तदवस्थात्व-वर्णनम् अविरुद्धम् इति योजना ॥३९॥

ननु अप्रसिद्ध-संस्काराभ्युपगम-द्वारा विक्षेपावस्थात्व-वर्णनात् वरम्

अधिष्ठानतया प्रसिद्ध-ब्रह्मावस्थात्व-वर्ननम् इत्याशङ्क्य अतिप्रसङ्गात् मैवम्

इति परिहरति -

बह्मण्यारोपितत्वेन ब्रह्मावस्थे इमे इति ।

न शङ्कनीयं सर्वासां ब्रह्मण्येव अधिरोपणात् ॥४०॥

संसारीति । संसारी कर्तृत्वादिधर्मवान् विबुद्धः तत्वसाक्षात्कारवान् निःशोकः

शोकरहितः ।

तुष्टो वक्ष्यमाणकृतकृत्यत्वादिजनितसन्तोषवान् अहमस्मीति उत्तरवस्था जीवगा

जीवाश्रिता

भान्ति न ब्रह्माश्रिता इत्यर्थः । ४१॥

एवं तर्ह्यज्ञानावरणयोरपि जीवाश्रितत्वेन अनुभूयमानत्वाज्जीवावस्था त्वमेवेति

परिहरति -

ननु ब्रह्मणि आरोपितत्वाविशेषेऽपि विक्षेपोत्पत्त्युत्तर-काल-भाविनीनां संसारित्वाद्यवस्थनां जीवाश्रितत्वेन अनुभूयमानत्वात् न ब्रह्मावाथात्वम् इति शङ्कते -

संसार्यहं विबुद्धोऽहं निःशोकस्तुस्त इत्यपि
जीवगा उत्तरावस्था भान्ति न ब्रह्मगा यदि ॥४१॥

संसारीति। संसारी कर्तृत्वादिधर्मवान् विबुद्धः तत्वसाक्षात्कारवान् निःशोकः शोकरहितः।
तुष्टो वक्ष्यमाण-कृतकृत्यत्वादि-जनितसंतोषवान् अहमस्मीति उत्तरावस्था जीवगा जीवाश्रिता
भान्ति न ब्रह्माश्रिता इत्यर्थः॥ ४१॥

एवं तर्ह्यज्ञानावरणयोरपि जीवाश्रितत्वेन अनुभूयमानत्वाज्जीवावस्थात्वम् एवेति परिहरति -

तर्ह्यज्ञोऽहं ब्रह्मसत्वभाने मद्दृष्टितो न हि ।
इति पूर्वे अवस्थे च भासेते जीवगे खलु ॥४२॥

तर्ह्यज्ञोहमिति। मद्दृष्टितो ममानुभवेनेत्यर्थः ॥४२॥

ननु तर्ह्यज्ञानाश्रयत्वं ब्रह्मणः पूर्वाचार्यैः कथमुक्तमित्याशङ्क्य तद्विवक्षां दर्शयति -

अज्ञानस्याश्रयो ब्रह्म इत्यधिष्ठानतया जगुः ।

जीवावस्थात्वमज्ञानाभिमानित्वाद् अवादिषम् ॥४३॥

अज्ञानस्येति । ब्रह्मणोऽज्ञानाधिष्ठानत्वविवक्षया तदाश्रयत्वमुक्तमित्यर्थः ।

भवद्भिस्तर्हि किं विवक्षया जीवावस्थात्वमुक्तमित्याशङ्क्य स्वविवक्षां दर्शयति -

जीवावस्थात्वमिति ॥४३॥

एवं बन्धहेतुभूतमवस्थात्रयं प्रदर्श्य अवशिष्टास्ववस्थासु मध्ये

पूर्वोक्ताज्ञानावरणनिवृत्तिद्वारा मुक्तिहेतुमवस्थाद्वयं दर्शयति -

ज्ञानद्वयेन नष्टेऽस्मिन्नज्ञाने तत्कृतावृत्तिः ।

न भाति नास्ति चेत्येषा द्विविधापि विनश्यति ॥

ज्ञानद्वयेनेति । परोक्षत्वापरोक्षत्वलक्षणेन ज्ञान्द्वयेन आवरणकरणे अज्ञाने नष्टे

सति तत्कृतावृत्तिः तेनाज्ञानेनोत्पादितं न भाति नास्ति इति व्यवहारकारणं

द्विविधमप्यावरणं कारणाभावान्नश्यतीति ॥४४॥

कस्यांश्स्य केन निवृत्तिरित्यपेक्षायां उभयं विभज्य दर्शयति -

ष्ट

द् जी

एवं बन्ध-हेतु-भूतम् अवस्थात्रयं प्रदर्श्य अवशिष्टास्ववस्थासु मध्ये

पूर्वोक्ताज्ञानावरण-निवृत्तिद्वारा मुक्तिहेतुमवस्थाद्वयं दर्शयति -

ज्ञानद्वयेन नष्टेऽस्मिन् अज्ञाने तत्कृतावृतिः ।

न भाति नास्ति चेत्येषा द्विविधापि विनश्यति ॥४४ ॥

ज्ञानद्वयेनेति । परोक्षत्वापरोक्षत्वलक्षणेन ज्ञानद्वयेन आवरणकारणे अज्ञाने नष्टे सति तत्कृतावृतिः तेनाज्ञानेनोत्पादितं न भाति नास्ति इति व्यवहारकारणं द्विविधमप्यावरणं कारणाभावान्नश्यतीति ॥४४ ॥

कस्यांशस्य केन निवृत्तिरित्यपेक्षायाम् उभयं विभज्य दर्शयति -

परोक्षज्ञानतो नश्येद् असत्वावृति-हेतुता ।

अपरोक्षज्ञाननाश्या ह्यभानावृति-हेतुता ॥४५ ॥

परोक्षज्ञानत इति । कूटस्थोऽस्ति इत्येवंरूपात् परोक्षज्ञानात् अज्ञानस्यासत्वावरणकारणत्वं निवर्तते । कूटस्थोऽस्मि इत्यपरोक्षज्ञानेन तु कूटस्थो न भाति इत्येवंरूपावरणकारणत्वं निवर्तते ॥४५ ॥

इदानीं ज्ञानस्य फलरूपावस्थाद्वये प्रथमावस्थामाह -

अभानावरणे नष्टे जीवत्वारोपसंक्षयात् ॥

कर्तृत्वाद्यखिलः शोकः संसाराख्यो निवर्तते ॥४६ ॥

अभानावरण इति । अभानावरणे निवृत्ते भ्रान्त्या प्रतीयमानस्य जीवत्वस्यापि निवृत्तत्वात्तन्निमित्तकः कर्तृत्वादिलक्षणः संसाराख्यः शोकः सर्वोऽपि निवर्तत इत्यर्थः ॥४६ ॥

एवं शोकापगमरूपामवस्थां प्रदर्श्य निरङ्कुशातृप्तिलक्षणां द्वितीयां दर्शयति -

निवृत्ते सर्वसंसारे नित्यमुक्तत्वभासनात् ।

निरङ्कुशा भवेत्तृप्तिः पुनः शोकासमुद्भवात् ॥४७ ॥

निवृत्ते सर्वसंसार इति ॥४७ ॥

परोक्षज्ञानेति । अपरोक्षज्ञानकाल इव परोक्षज्ञानकालेऽपि विषयस्य ब्रह्मणः

स्वप्रकाशताऽस्त्येव ।तत्रोपपत्तिमाह - ब्रह्म स्वप्रकाशमिति ॥५० ॥

प्रत्यगभिन्नब्रह्मगोचरस्य ज्ञानस्य कुतः परोक्षत्वमित्याशङ्क्य

प्रत्यगंशाग्रहणादित्याह-

अहं ब्रह्मेत्यनुल्लिख्य ब्रह्मास्तीत्येवमुल्लिखेत् ।

परोक्षज्ञानमेतन्न भ्रान्तं बाधानिरूपणात् ॥५१ ।

अहं ब्रह्मेति । नन्विदं भ्रान्तम् इत्याशङ्क्य अस्य भ्रान्तत्वं किं बाध्यत्वात् उत

व्यक्त्यनुल्लेखात् अथ वा आपरोक्ष्येण ग्रहण-योग्यस्य पारोक्ष्येण ग्रहणात् यद्वा

अंशाग्रहणात् इति चतुर्धा विकल्प्य प्रथमं प्रत्याह-एतदिति ॥५१ ॥

हेतुं विवृणोति-

ब्रह्म नास्तीति मानं चेत् स्याद् बाध्येत तदा ध्रुवम् ॥

न चैवं प्रबलं मानं पश्यामोऽतो न बाध्यते ॥५२ ॥

ब्रह्म नास्तीति ॥५२ ॥

द्वितीयमतिप्रसङ्गेन दूषयति ।-

व्यक्त्यनुल्लेखमात्रेण भ्रमत्वे स्वर्गधीरपि ।

भ्रान्तिः स्याद् व्यक्त्यनुल्लेखात् सामान्योल्लेखदर्शनात् ॥५३ ॥

व्यक्तीति । अयं स्वर्ग इत्येवमाकारेण ग्रहणाभावात् किंतु स्वर्गोऽस्ति इत्येवं सामान्याकारेण प्रतीतेः स्वर्गबुद्धेरपि भ्रमत्वप्रसङ्ग इत्यर्थः ॥५३ ॥

तृतीयं निराकरोति-

अपरोक्षत्वयोग्यस्य न परोक्षमतिर्भ्रमः ।

परोक्षम् इत्यनुल्लेखाद् अर्थात्पारोक्ष्य-सम्भवात् ॥५४ ॥

अपरोक्षत्वेति । अपरोक्षत्वेन ग्रहण-योग्यस्य प्रत्यगभिन्न-ब्रह्मविषयस्य परोक्षज्ञानस्य भ्रमत्वं न सम्भवति । कुत इत्यत आह - परोक्षमिति । ब्रह्म परोक्षमित्येवमाकारेण ग्रहणाभावात् कुतस्तर्हि तस्य परोक्षत्वमित्याशङ्क्याह - अर्थादिति । इदं ब्रह्म इत्येवं व्यक्त्युल्लेखाभाव-सामर्थ्यात् परोक्षत्वसिद्धिरिति भावः ॥५४ ॥

चरममाशङ्कते -

अंशागृहीतेः भ्रान्तिश्चेत् घटज्ञानं भ्रमो भवेत् ।

निरंशस्यापि सांशत्वं व्यावर्त्यांश-विभेदतः ॥५५ ॥

अंशेति । ब्रह्मांश-ग्रहणेऽपि प्रत्यगंशाग्रहणाद् भ्रमत्वमित्यर्थः । एवं तर्हि घटादिज्ञानस्यापि भ्रमत्वप्रसङ्ग इति परिहरति - घटज्ञानमिति । आन्तरावयवानामग्रहणादिति भावः । ननु घटस्य सावयवत्वाद् अंशग्रहणेऽपि अंशाग्रहणं संभवति ब्रह्मणस्तु निरंशत्वात् कथमंशग्रहणसंभव इत्याशङ्क्य व्यावर्त्यांशोपाधि-निमित्तकं सांशत्वं तस्य भविष्यतीत्याह - निरंशस्येति ॥५५॥

कौ तौ व्यावर्त्यौ अंशौ इत्याकाङ्क्षायामाह-

असत्वांशो निवर्तेत परोक्षज्ञानतस्तथा ।
अभानांशनिवृत्तिः स्यादपरोक्षधिया कृता ॥५६॥

असत्वांश इति ॥५६॥

अपरोक्षत्वेन ग्रहणयोग्यविषयं परोक्षज्ञानं भ्रमो न भवतीत्येतद् दृष्टान्त-प्रदर्शनेनापि द्रढयति-

दशमोऽस्तीति विभ्रान्तं परोक्षज्ञानमीक्ष्यते ।
ब्रह्मास्तीत्यपि तद्वत् स्याद् अज्ञानावरणं समम् ॥५७॥

दशम इति । दशमोऽस्ति इत्याप्तवाक्यजन्यं परोक्षज्ञानम् अभ्रान्तं यथा ब्रह्मास्तीति वाक्यजन्यज्ञानमपि तद्वदभ्रान्तं स्यात् । अज्ञानकृतस्य असत्वावरणांशस्य समत्वादिति भावः ॥५७॥

ननु वाक्यात्परोक्षज्ञानमुत्पद्यते चेत् अपरोक्षज्ञानं कुतो जायत इत्याशङ्क्य विचारसहिताद् वाक्याद् एवेत्याह -

आत्मा ब्रह्मेति वाक्यार्थे निःशेषेण विचारिते ।
व्यक्तिरुल्लिख्यते यद्वद्दशमस्त्वमसीत्यतः ॥५८ ॥

आत्मेति । अयमात्मा ब्रह्म बृ २ ।५ ।१९ इति महावाक्यार्थे सम्यग्विचार्यमाणे पूर्वमस्तीति परोक्षतयाऽवगतस्य ब्रह्मणः प्रत्यगभिन्नत्वं साक्षात्क्रियते । तत्र दृष्टान्तः - यद्वदिति । दशमस्त्वमसि इत्यतो वाक्यात्स्वात्मनि दशमत्वं यथा साक्षात्क्रियते तद्वदित्यर्थः ॥५८ ॥

विचारसहकृतेन वाक्येन अपरोक्षज्ञानोत्पत्तिप्रकारं सदृष्टान्तमाह-

दशमः क इति प्रश्ने त्वमेवेति निराकृते ।
गणयित्वा स्वेन सह स्वमेव दशमं स्मरेत् ॥५९ ॥

दशम इति । त्वयाऽस्तीति निरूपितो दशमः कः इति प्रश्ने कृते तस्य त्वमेव इति परिहारेऽभिहिते स्वात्मना सह इतरान्नव गणयित्वा अहं दशमोस्मि इति स्वमेव दशमं स्मरेद् इत्यर्थः ॥५९ ॥

अस्य दशमोस्मि इति ज्ञानस्य विचारसहितवाक्यजनितत्वात् न विपर्ययादिरूपतेत्याह-

दशमोस्मीति वाक्योत्था न धीरस्य विहन्यते ।

आदिमध्यावसानेषु न नवत्वस्य संशयः ॥६० ॥

दशम इति । अस्य दशमस्य त्वमेव दशमोऽसि इति वाक्यात्

परिगणनादिलक्षण-विचार-सहिताद् उत्पन्नः अहं दशमोऽस्मि इति बुद्धिर्न

विहन्यते न केनापि ज्ञानेन बध्यते । परिगणनक्रियायां च नवानाम्

आदिमध्यावसानेषु परिगणनेऽपि अहं दशमो न वा इति संशयश्च न भवेत् अतः

सा दृढापरोक्षरूपेत्यर्थः ॥६० ॥

एतत्सर्वं दार्ष्टान्तिके योजयति -

सदेवेत्यादिवाक्येन ब्रह्मसत्त्वं परोक्षतः ।

गृहीत्वा तत्त्वमस्यादि-वाक्याद् व्यक्तिं समुल्लिखेत् ॥ ६१ ॥

सदेवेत्यादीति । सदेव सोम्य इदमग्र आसीद् एकमाद्वितीयम् छा ६ ८ १

इत्यादिवाक्येन ब्रह्मसद्भावं प्रथमं निश्चित्य तस्य जीवरूपेण

प्रवेशादियुक्तिपर्यालोचनया प्रत्यग्रूपत्वं संभाव्य तत्वमसि छा ६ ८ २

इत्यादिवाक्येन अद्वितीयब्रह्मरूपमात्मानम् अहं ब्रह्मास्मीति

साक्षात्कुर्यात् ॥६१ ॥

आदिमध्यावसानेषु स्वस्य ब्रह्मत्वधीरियम् ।

नैव व्यभिचरेत् तस्माद् आपरोक्ष्यं प्रतिष्ठितम् ॥६२ ॥

आदिमध्येति । अत इयमात्मनो ब्रह्मत्वबुद्धिः पञ्चानां कोशानाम्
आदिमध्यावसानेष्वात्मनो व्यवहारेऽपि नैवान्यथा भवति अतोऽस्या
बुद्धेरपरोक्षज्ञानत्वं सुस्थितमित्यर्थः ॥६२॥
नन्वेवं प्रथमतः केवलं वाक्यात् परोक्षज्ञानमुत्पद्यते पश्चात् विचारसहितात्
अपरोक्षज्ञानम् इत्येतत् कुतोऽवगम्यत इत्याशङ्क्य तैत्तिरीयकादि-श्रुत्यर्थ-
पर्यालोचनयेत्याह -
जन्मादिकारणत्वाख्य-लक्षणेन भृगुः पुरा ।
पारोक्ष्येण गृहीत्वाथ विचाराद् व्यक्तिम् ऐक्षत ॥६३॥
जन्मादीति । भृगुनामकः कश्चिद्दृषिः पुरा यतो वा इमानि भूतानि जायन्ते । येन
जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्तीति ।तद्विजिज्ञासस्व । तद्-ब्रह्मेति तै
३ १ इति वाक्यश्रुतेन जगज्जन्मादिकारणत्वाख्यलक्षणेन जगत्कारणं ब्रह्म
परोक्षतयाऽवगत्य अन्नमयादि-पञ्चकोश-विचाराद् व्यक्तिं प्रत्यगात्मरूपं ब्रह्म
दृष्टवान् इत्यर्थः ॥६३॥
नन्वस्मिन्प्रकरणे त्वं ब्रह्मासि इत्येवम्-आद्युपदेश-वाक्याभावात् कथं भृगोः
आत्मसाक्षात्कार इत्याशङ्क्य आत्म-साक्षात्कार-हेतु-विचार-योग्यस्थल-
प्रदर्शनाद् इत्याह -
यद्यपि त्वमसीत्यत्र वाक्यं नोचे भृगोः पिता ।

तथाप्यन्नं प्राणमिति विचार्य स्थलमुक्तवान् ॥६४ ॥

यद्यपीति ॥६४ ॥

नन्वन्नमयादिकोशेषु विचारितेषु प्रतीचः साक्षात्कारो भवतु ब्रह्मणस्तु कथमित्याशङ्क्य प्रतीच एव ब्रह्मत्वात् पञ्चकोश-विचारेण आनन्दात्म-व्यक्तिं साक्षात्कृत्य आनन्दाद्धयेव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्ति तै ३ ६ इत्येवं ब्रह्मलक्षणमपि प्रतीच्येव योजितवान् इत्याह-

अन्नप्राणादिकोशेषु सुविचार्य पुनः पुनः ।

आनन्दव्यक्तिमीक्षित्वा ब्रह्मलक्ष्मापि अयूयुजत् ॥६५ ॥

अन्नप्राणादीति ॥६५ ॥

ननु ब्रह्मलक्षणस्य आनन्दात्मरूपेण प्रतीचि योजनं न घटेत ब्रह्मणस्तटस्थत्वेन प्रतीचो भिन्नत्वादित्याशङ्क्य न भेदः सत्यादिलक्षणस्य ब्रह्मणः प्रत्यग्रूपेण अवस्थानश्रवणादित्याह -

सत्यं ज्ञानमनन्तं चेत्येवं ब्रह्मस्वलक्षणम् ।

उक्त्वा गुहाहितत्वेन कोशेष्वेतत् प्रदर्शितम् ॥६६ ॥

सत्यमिति । सत्यं ज्ञानमनन्तं बह्म तै २ ।१ ।१ इत्येवं ब्रह्मस्वलक्षणं ब्रह्मणः स्वरूपलक्षणमभिधाय यो वेद निहितं गुहायां परमे व्योमन् तै २ ।१ इत्यनेन वाक्येन पञ्चकोशगुहान्तःस्थितत्वेन तस्यैव प्रत्यग्रूपत्वमभिहितमित्यर्थः ॥६६ ॥

एवं तैत्तिरीय-श्रुतिपर्यालोचनया भृगोः परोक्षज्ञानपूर्वकविचारजन्यत्वं साक्षात्कारस्य दर्शयित्वा छान्दोग्य-श्रुति-पर्यालोचनेनापि तद्दर्शयति -

पारोक्ष्येण विबुध्येन्द्रो य आत्मेत्यादिलक्षणात् ।
अपरोक्षीकर्तुमिच्छन् चतुर्वारं गुरुं ययौ ॥६७ ॥

पारोक्ष्येणेति । इन्द्रः य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकः छा ८ ।७ ।१ इत्यादि-वाक्य-प्रतिपादितेन लक्षणेन आत्मानं परोक्षतयाऽवगत्य विचारात् शरीर-त्रय-निराकरणेन तत्साक्षात्करणाय गुरुं ब्रह्माणं चतुर्वारमुपसन्न इति छान्दोग्योपनिषदि अष्टमाध्याये श्रूयते ॥६७ ॥

इदानीम् ऐतरेयश्रुतावपि तद्दर्शयति -

आत्मा वा इदमित्यादौ परोक्षं ब्रह्म लक्षितम् ।
अध्यारोप-अपवादाभ्यां प्रज्ञानं ब्रह्म दर्शितम् ॥६८ ॥

आत्मा वा इति । आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् ऐ १ ।१ ।१ इत्यनेन वाक्येन ब्रह्मणः लक्षणमभिधाय स ईक्षत लोकान्नु सृजा इति ऐ ४ ।१ ।२ इत्युपक्रम्य तस्य त्रय आवसथाः त्रयः स्वप्ना अयम्

आवसथोऽयमावसथोऽयमावसथः ऐ ४ ।३ ।१२ इत्यनेन परमात्मनि जगदध्यारोपण-प्रकारम् अभिधाय स जातो भूतान्यभिव्यैक्षत किमिहान्यं वावदिषत् ऐ ४ ।३ ।१२ इति तस्यारोपितस्य अपवादम् अभिधाय स एतमेव पुरुषं ब्रह्म ततमम् अपश्यद् इदम् अदर्शम् इति ऐ ४ ।३ ।१२ इति प्रत्यगात्मनो ब्रह्मस्वरूपत्वमभिहितम् । पुनश्च पुरुषे ह वा ऐ ५ ।४ ।१ इत्यादिना ज्ञान-साधन-वैराग्य-जननाय गर्भ-वासादि-दुःखं प्रदर्श्य कोऽयमात्मेति वयमुपास्महे ऐ ६ ।५ ।१ इत्यादिना विचारेण तत्त्वं-पदार्थ-परिशोधन-पुरःसरं प्रज्ञानं ब्रह्म ऐ ६ ।५ ।३ । इति प्रज्ञान-रूपस्यात्मनः ब्रह्मत्वं दर्शितमित्यर्थः ॥६८ ॥

उक्तन्यायम् इतरासु श्रुतिष्वप्यतिदिशति -

अवान्तरेण वाक्येन परोक्षा ब्रह्मधीर्भवेत् ।
सर्वत्रैव महावाक्यविचाराद् अपरोक्षधीः ॥६९ ॥

अवान्तरेणेति । सर्वत्र सर्वासु श्रुतिष्वित्यर्थः ॥६९ ॥

ननु महावाक्यविचारस्य अपरोक्षज्ञानजनकत्वं स्वकपोल-कल्पितम् इत्याशङ्क्य वाक्यवृत्तौ आचार्यैस्तथा प्रतिपादितत्वाद् मैवम् इत्याह -

ब्रह्मापरोक्ष्यसिद्ध्यर्थं महावाक्यमितीरितम् ।
वाक्यवृत्तौ अतो ब्रह्मापरोक्ष्ये विमतिर्नहि ॥७० ॥

ब्रह्मापरोक्ष्ये इति । अतो वाक्यात् ब्रह्मापरोक्षज्ञाने

विप्रतिपत्तिर्नास्तीत्यर्थः ॥७० ॥

वाक्यवृत्तौ उपपादनप्रकारं दर्शयति –

आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः ।

अन्तःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥७१ ॥

७२-७४ मिस्सिन्ग्

संसर्ग इति ।लोके गामानय इत्यदौ पदेःस्मारितानां आकाङ्क्षादिमतां

गवादिपदार्थनामन्वयो वाक्यार्थत्वेनाङ्गीकृतःयथा नीलं महत्सुगन्ध्यमुत्पलम्

इत्यादौ नीलत्वादिविशिष्टस्योत्पलस्य वाक्यार्थत्वं स्वीकृतं नैवमत्र महावाक्येषु

संसर्गविशिष्टयोरन्वतरस्य वाक्यार्थत्वमभ्युपगम्यते किंतु अखण्डैकरसत्वेन

स्वगतादिभेदशून्यवस्तुमात्ररूपेण वाक्यार्थो विद्वद्भिरभ्युपेयते अतो लक्षणा

आश्रयणीयेत्यर्थः ॥७५ ॥

अखण्डैकरसं वाक्यार्थं दर्शयति ।

प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः ।

अद्वयानन्दरूपस्य प्रत्यग्बोधैकलक्षणः ॥७६ ॥

प्रत्यग्बोध इति ।यः प्रत्यग्बोधः सर्वान्तरश्चिदात्मा आभाति बुद्ध्यादिसाक्षित्वेन

स्फुरति सोऽद्वयानन्दलक्षणः अद्वितीय आनन्दरूपः परमात्मेत्यर्थः ।

अद्वयानन्दरूपश्च तथाविधः परमात्मा प्रत्यग्भोधकलक्षणाश्चिदेकरसः

प्रत्यगात्मेवेत्यर्थः ॥७६॥

एवम् अखण्डार्थबोधेन किं स्याद् इत्यत आह -

इत्थम् अन्योन्य-तादात्म्य-प्रतिपत्तिर्यथा भवेत्।

अब्रह्मत्वं त्वमर्थस्य व्यवर्तेत तदैव हि ॥७७॥

इत्थम् इति ॥७७॥

तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु।

पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥७८॥

तदर्थस्येति। त्वमर्थस्य प्रत्यगात्मनोऽब्रह्मत्वं भ्रान्ति-सिद्धाऽब्रह्मरूपता

तदर्थस्य ब्रह्मणः च पारोक्ष्यं परोक्षज्ञानैकविषयत्वं च निवर्तते। ततोऽपि

किमिति पृच्छति - यद्येवम् इति।

ननु समयबलेन सम्यक्परोक्षानुभव-साधनम् आगमः इत्यागमलक्षणम् अतो

वाक्यस्य अपक्सा-ज्ञान-जनकत्वं कथम् उच्यते इत्याशन्क्य सिद्धान्त-

परिज्ञान-शून्यः अयम् इति मनसि निधाय उपहसति -

एवं सति महावाक्यात् परोक्ष-ज्ञानम् ईर्यते।

यैस्तेषां शास्त्र-सिद्धान्तविज्ञानं शोभतेतराम् ॥७९॥-

एवं सति इति। एवं वदन्तः सिद्धान्त-रहस्यं ते न जानन्ति इत्यर्थः॥ ।७९॥

ननु सिद्धान्तस्तवस्तिष्ठतु वाक्यस्य परोक्ष-ज्ञान-जनकत्वंतु अनुमान-सिद्धम् इति शङ्कते -

आस्तां शास्तर्स्य सिद्धान्तो युक्त्या वाक्यात् परोक्ष-धीः।
स्वर्गादि-वाक्यवद् नैवं दशमे व्यभिचारतः ॥८०॥

एवम् अखण्डार्थबोधेन किं स्याद् इत्यत आह -

इत्थम् अन्योन्य-तादात्म्य-प्रतिपत्तिर्यथा भवेत्।
अब्रह्मत्वं त्वमर्थस्य व्यवर्तेत तदैव हि ॥७७॥

इत्थम् इति ॥७७॥

तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥७८॥

तदर्थस्येति। त्वमर्थस्य प्रत्यगात्मनोऽब्रह्मत्वं भ्रान्ति-सिद्धाऽब्रह्मरूपता तदर्थस्य ब्रह्मणः च पारोक्ष्यं परोक्षज्ञानैकविषयत्वं च निवर्तते। ततोऽपि किमिति पृच्छति - यद्येवम् इति। उत्तरम् आह - शृणु इति ॥७८॥

ननु समयबलेन सम्यक्परोक्षानुभव-साधनम् आगमः इत्यागमलक्षणम्। अतो वाक्यस्य अपरोक्ष-ज्ञान-जनकत्वं कथम् उच्यते इत्याशङ्क्य सिद्धान्त-परिज्ञान-शून्यः अयम् इति मनसि निधाय उपहसति -

एवं सति महावाक्यात् परोक्ष-ज्ञानम् ईर्यते।

यैस्तेषां शास्त्र-सिद्धान्त-विज्ञानं शोभतेतराम् ॥७९॥

एवं सति इति। एवं वदन्तः सिद्धान्त-रहस्यं ते न जानन्ति इत्यर्थः॥ ।७९॥

ननु सिद्धान्तः तावत्तिष्ठतु वाक्यस्य परोक्ष-ज्ञान-जनकत्वं तु अनुमान-सिद्धम् इति शङ्कते -

आस्तां शास्त्रस्य सिद्धान्तो युक्त्या वाक्यात् परोक्ष-धीः।
स्वर्गादि-वाक्यवद् नैवं दशमे व्यभिचारतः ॥८०॥

आस्तामिति। विमतं वाक्यं परोक्षज्ञानजनकं भवितुमर्हति वाक्यत्वात् स्वर्गादिप्रतिपादकवाक्यवत् इत्यनुमानेन परोक्षज्ञानजनकत्वं सिद्धमित्यर्थः। अनैकान्तिकोऽयं हेतुरिति परिहरति - नैवमिति। दशमस्त्वमसि इति वाक्ये वाक्यत्वे सति अपरोक्ष-ज्ञान-जनकत्वस्य उपलम्भादिति भावः॥८०॥

किंच त्वंपदार्थस्य जीवस्य अपरोक्षत्वाभाव-प्रसङ्गादपि न महावाक्यं परोक्षज्ञानजनकमित्यङ्गीकार्यमित्याह -

स्वतोऽपरोक्षजीवस्य ब्रह्मत्वमभिवाञ्छतः।
नश्येत् सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ॥८१॥

स्वत इति ॥८१॥

इष्टापत्तिरित्याशङ्क्याह -

वृद्धिम् इष्टवतो मूलम् अपि नष्टमितीदृशम्।

लौकिकं वचनं सार्थं सम्पन्नं त्वत्प्रसादतः ॥८२॥

वृद्धमिति ॥८२॥

ननु सोपाधिकत्वाज्जीवस्यापरोक्षत्वं युक्तं ब्रह्मणस्तु निरुपाधिकत्वात् तन्न युज्यते इति शङ्कते -

अन्तःकरणसम्भिन्न-बोधो जीवोऽपरोक्षताम्।

अर्हत्युपाधिसद्भावाद् न तु ब्रह्मानुपाधितः ॥८३॥

अन्तःकरणेति ॥८३॥

ब्रह्मणो निरुपाधिकत्वम् असिद्धम् इति परिहरति -

नैवं ब्रह्मत्व-बोधस्य सोपाधि-विषयत्वतः।

यावद् विदेह-कैवल्यम् उपाधेरनिवारणात् ॥८४॥

नैवं ब्रह्मेति। जीवस्य ब्रह्मरूपताज्ञानं यदस्ति तस्य सोपाधिक-वस्तु-विषयत्वात् तद्विषयस्य ब्रह्मणोऽपि सोपाधिकत्वं ज्ञानस्य सोपाधिकत्वं च ज्ञेयस्य सोपाधिकत्वमन्तरेण न घटते इति भावः। तदेव कुतः इत्यत आह -

यावद् इति ॥८४॥

अन्तःकरण-साहित्य-राहित्याभ्यां विशिष्यते।

उपाधिर्जीवभावस्य ब्रह्मतायाश्च नान्यथा ॥८५॥

अन्तः-करणेति । जीवभाव-ब्रह्मभावयोः अन्तःकरण-साहित्य-राहित्ये एव उपाधी इत्यर्थः ॥८५॥

ननु अन्तःकरण-सम्बन्धस्य भावरूपत्वाद् उपाधित्वम् अस्तु न अभावरूपस्य तद्राहित्यस्य अन्तःकरण-राहित्यस्य तदुचितम् इत्याशङ्क्य यावत्कार्यम् अवस्थायिभेदहेतोः उपाधिता इत्युक्तोपाधि-लक्षणस्य साहित्य-राहित्ययोः उभयोः अपि सत्त्वाद् उचितम् एव उपाधित्वम् इत्यभिप्रायेण परिहरति -

यथा विधिरुपाधिः स्यात् प्रतिषेधस्तथा न किम् ।
सुवर्णलोह-भेदेन शृङ्खलात्वं न भिद्यते ॥८६॥

यथेति । विधिः भावरूपः अन्तःकरण-सम्बन्धः यथा उपाधिः स्यात् तथा प्रतिषेधः अभावरूपः अन्तःकरणवियोगः न किं उपाधिः न स्यात् किम् स्यादेव इत्यर्थः । तथापि भावाभावरूपत्व-लक्षणम् अवान्तर-वैलक्षण्यं दृश्यते एव इत्याशङ्क्य तस्य अकिंचित्करत्वेन अनादरणीयत्वम् इत्यभिप्रेत्य दृष्टान्तम् आह - सुवर्णेति । पुरुष-प्रचार-निरोधकत्वांशे अनुपयुक्तं सुवर्णत्व-लोहत्वादि-वैलक्षण्यम् यद्वद् अनादरणीयं तद्वद् इत्यर्थः ॥८६॥

विधेरिव निषेधस्यापि ब्रह्म-बोध-उपायत्वेन ब्रह्म-उपाधित्वं द्रढयितुं विधि-निषेधयोः उभयोः अपि ब्रह्म-बोध-उपायत्वम् आचार्यैः निरूपितम् इति दर्शयति -

तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।

पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवशिष्यते ॥ ७८ ॥

अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च ।

वेदान्तानां प्रवृत्तिः स्याद् द्विधा-इत्याचार्य-भाषितम् ॥ ८७ ॥

तत्-शब्देन ब्रह्म अभिधीयते अतत्-शब्देन तद्-अतिरिक्तम् अज्ञानादि नेति नेति इत्यादिव्यावृत्तिः निरसनम् न तत् अतत् तस्य प्रपञ्चस्य व्यावृत्तिः निरसनं तदेव रूपं उपायः तेन साक्षात् विधिमुखेन च विधिः विधानं साक्षाद् वाचकशब्दप्रयोगः सत्यं ज्ञानम् अनन्तम् तै २।१।१ इत्येवम् आदिरूपः तेन च विधिमुखेन तद्-द्वारेणापि इत्यर्थः । वेदान्तानाम् उपनिषदां पवृत्तिः प्रवर्तनं प्रतिपादनं ब्रह्मणि इति शेषः ॥८७ ॥

ननु वेदान्तानाम् अतद्-व्यावृत्त्या ब्रह्मबोधकत्व-अङ्गीकारे अहं-शब्दार्थस्य कूटस्थस्यापि त्याग-प्रसङ्गात् अहं ब्रह्मास्मि इति सामानाधिकरण्तेन ज्ञानं नोदेतुम् अर्हति इति शङ्कते -

अहमर्थपरित्यागाद् अहं ब्रह्मेति धीः कुतः ।

नैवम् अंशस्य हि त्यागो भागलक्षणयोदितः ॥ ८८ ॥

अहं-शब्दार्थस्य सर्वस्य अव्यक्तत्वाद् मैवम् इति परिहरति - नैवम् इति । हि यस्मात् कारणात् भागलक्षणया जहद्-अजहद्-लक्षणया अंशस्य अहं-

शब्दार्थैकदेशस्य जडांशस्य ईरितः न कूटस्थस्य। अतः अहम् ब्रह्मास्मि इति ज्ञानम् उपपद्यते इत्यर्थः ॥८८॥

अन्तःकरणसन्त्यागाद् अवशिष्टे चिदात्मनि।
अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणि ईक्ष्यते॥ ८९॥

ननु केवलस्य प्रत्यगात्मनः स्वप्रकाशत्वाद् बुद्धिवृत्तिविषयत्वं न घटते इत्याशङ्क्याह -

स्वप्रकाशोऽपि साक्ष्येव धीवृत्त्या व्याप्यतेऽन्यवत्।
फलव्याप्यत्वम् एवास्य शास्त्रकृद्भिर्निवारितम्॥९०॥

स्वप्रकाश इति। अन्यवत् घटादिवदित्यर्थः। स्वप्रकाशोऽहम् इत्येवं बुद्धिवृत्ति-संभवादिति भावः। तर्हि अपसिद्धान्तापात इत्याशङ्क्य पूर्वाचार्यैरपि वृत्ति-व्याप्यत्वस्य अङ्गीकृतत्वाद् नायम् अपसिद्धान्त इति परिहरति -

फलव्याप्यत्वमिति। फलं वृत्ति-प्रतिबिम्बित-चिदाभासः तद्-व्याप्यत्वम् एव अस्य प्रत्यगात्मनो निराकृतं स्वस्यैव स्फुरण-रूपत्वाद् इति भावः॥९०॥

आत्मनि फलव्याप्ति-अभावं दर्शयितुं अनात्मनो वृत्त्या फलेन च व्याप्यत्वं दर्शयति -

बुद्धि-तत्स्थ-चिदाभासौ द्वावपि व्याप्नुतो घटम्।
तत्र अज्ञानं धिया नश्येद् आभासेन घटः स्फुरेत्॥९१॥

बुद्धितदिति। उभयव्याप्तेः प्रयोजनमाह - तत्रेति। तत्र तयोः बुद्धिचिदाभासयोः मध्ये धिया बुद्धिवृत्त्या प्रमाणभूतया अज्ञानं नश्यति ज्ञानाज्ञानयोर्विरोधात्। आभासेन चिदाभासेन घटः स्फुरेत् जडत्वेन स्वतःस्फुरणायोगादिति भावः ॥९१॥

इदानीम् आत्मनि ततो वैलक्षण्यं दर्शयति -

ब्रह्मणि अज्ञान-नाशाय वृत्ति-व्याप्तिरपेक्षिता।
स्वयं-स्फुरणरूपत्वाद् न आभास उपयुज्यते ॥९२॥

ब्रह्मणीति। प्रत्यग्-ब्रह्मणोः एकत्वस्य अज्ञानेनावृतत्वात् तस्य अज्ञानस्य निवृत्तये वाक्यजन्यया अहं ब्रह्मास्मि इत्येवं-आकारया धीवृत्त्या व्याप्तिः अपेक्ष्यते स्वस्यैव स्फुरणरूपत्वात् तत्स्फुरणाय चिदाभासो नापेक्ष्यते अतो युज्यमानोऽपि चिदाभासो नोपयुज्यत इत्यर्थः ॥९२॥

उक्तमर्थं दृष्टान्तप्रदर्शनेन विशदयति -

चक्षुर्दीपौ अपेक्ष्येते घटादेर्दर्शने यथा।
न दीपदर्शने किंतु चक्षुरेकमपेक्ष्यते ॥९३॥

चक्षुरिति। अन्धकारावृत-घटादिदर्शने चक्षुर्दीपौ उभावपि अपेक्ष्येते दीपप्रदर्शने तु तया न किंतु एकं चक्षुरेवापेक्ष्यते यथा तथा ब्रह्मण्यज्ञाननाशाय इति पूर्वेण संबन्धः ॥९३॥

ननु बुद्धितद्वृत्तीनां चिदाभास-वैशिष्ट्य-स्वाभाव्यात् घटादिष्विव ब्रह्मण्यपि फलव्याप्तिः बलाद् भवेद् इत्याशङ्क्याह -

स्थितोऽप्यसौ चिदाभासो ब्रह्मण्येकीभवेत् परम्।
न तु ब्रह्मण्यतिशयं फलं कुर्याद् घटादिवत्॥९४॥

स्थितोऽपीति। यद्यपि घटाद्याकार-वृत्तिवद् ब्रह्म-गोचर-वृत्तावपि चिदाभासोऽस्ति तथापि नासौ ब्रह्मणो भेदेन भासते किंतु प्रचण्ड-आतपमध्य-वर्ति-प्रदीप-प्रभावात् तेन एकीभूत इव भवति अतः स्फुरण-लक्षणातिशय-जनको न ब्रह्मणीत्यर्थः॥९४॥

ननु ब्रह्मणि फलव्याप्तिर्नास्ति वृत्तिर्व्याप्तिस्तु विद्यत इत्युक्तं तत्र किं प्रमाणमित्याशङ्क्य आगमः प्रमाणमित्याह-

अप्रमेयमनादिं चेत्यत्र श्रुत्येदमीरितम्।
मनसैवेदमाप्तव्यमिति धिव्याप्यता श्रुता॥९५॥

अप्रमेयमिति। निर्विकल्पमनन्तं च हेतुदृष्टान्त-वर्जितम्। अप्रमेयम् अनादिं च यज्ज्ञात्वा मुच्यते बुधः अमृ वि ९ इत्यत्र अस्मिन्मन्त्रे श्रुत्याऽमृतबिन्दूपनिषदा अप्रमेय-शब्देन इदं फल-व्याप्ति-राहित्यम् उक्तम् मनसैवेदम् आप्तव्यं नेह नानास्ति किंचन बृ ४।४।१९ इति कठ-वल्ल्यां धीव्याप्यता श्रुता वृत्ति-व्याप्यत्वं श्रुतम् इत्यर्थः॥९५॥

आत्मानं चेद्विजानीयात् बृ ४ ।४ ।१२ इति मन्त्रेणापरोक्षज्ञानं शोकनिवृत्त्याख्यं जीवगतम् अवस्थाद्वयं अभिधीयते इत्युक्तम् अपरोक्षज्ञान-शोकनिवृत्त्याख्ये उभे इमे । अवस्थे जीवगे ब्रूते आत्मानं चेदिति श्रुतिः प्र ७ ।४८ इत्यनेन श्लोकेन तत्र कियतांशेन अपरोक्षज्ञानम् उच्यते इत्याकाङ्क्षायामाह -

आत्मानं चेद्विजानीयाद् अयमस्मीति वाक्यतः ।
ब्रह्मात्मव्यक्तिमुल्लिख्य यो बोधः सोऽभिधीयते ॥९६ ॥

आत्मानमिति । ब्रह्मात्मव्यक्तिं सत्यादिलक्षण-ब्रह्माभिन्न-प्रत्यगात्म-स्वरूपमुल्लिख्य विषयीकृत्य यो बोधो जायते ब्रह्माहमस्मि इति सोऽभिधीयते अनेन वाक्येनेत्यर्थः ॥९६ ॥

ननु तर्हि पूर्वोक्तरीत्या सकृद्वाक्यविचारादेव अपरोक्षज्ञानसिद्धेः आवृत्तिरसकृदुपदेशात् ब्र सू ४ १ १ इत्यादौ विहितं श्रवणाद्यावर्तनम् अनुष्ठेय स्याद् इत्याशङ्क्य ज्ञानदाढर्याय तदावर्तनानुष्ठानस्य आचार्यैरभिहितत्वाद् अनुष्ठेयमेवेत्याह -

अस्तु बोधोऽपरोक्षोऽत्र महावाक्यात् तथाप्यसौ ।
न दृढः श्रवणादीनाम् आचार्यैः पुनरीरणात् ॥९७ ॥

अस्तु बोध इति । अत्र ब्रह्मात्मविषये महावाक्यात् सकृच्छ्रुताद् विचारसहिताद् अपरोक्षबोधोऽस्तु । भवत्वेवं तथापि नासौ दृढः अतः श्रवणाद्यावर्तनीयं

श्रीमच्छंकराचार्यैः पुनः वाक्यार्थ-ज्ञानोत्पत्त्यनन्तरम् अपि श्रवणाद्यावर्तन-
अभिधानाद् इत्यर्थः। ज्ञानदाढर्याय इत्येतद् अर्थाल्लभ्यते ॥९७॥
आचार्यैः केन वाक्येन अभिहितम् इत्याशङ्क्य तद्वाक्यं पठति -
अहंब्रह्मेति वाक्यार्थ-बोधो यावद् दृढीभवेत्।
शमादिसहितस्तावद् अभ्यसेत् श्रवणादिकम् ॥९८॥
अहंब्रह्मेति ॥९८॥
ननु वाक्यप्रमाण-जनित-ज्ञानस्य अदाढर्यं कुत इत्याशङ्क्याह -
बाढं सन्ति ह्यदाढर्यस्य हेतवः श्रुत्यनेकता।
असंभाव्यत्वमर्थस्य विपरीता च भावना ॥९९॥
बाढमिति। हि यस्मात् कारणात् श्रुत्यनेकता श्रुतीनां नानात्वम् एको हेतुः
अर्थस्यापि अखण्डैकरसस्य अद्वितीय-ब्रह्मरूपस्य अलौकिकत्वेन
असंभावितत्वम् अपरः विपरीतभावना च पुनः कर्तृत्वाभिमानरूपः तृतीयः
इत्येवंविधाः अदाढर्यस्य हेतवो बाढं सन्ति सर्वथा विद्यन्ते
अतोऽपरोक्षानुभवदाढर्याय श्रवणादिकमावर्तनीयमिति भावः ॥९९॥
एवं त्रिविधान् अदाढर्य-हेतून् उपन्यस्य श्रुति-नानात्व-प्रयुक्त-अदाढर्यनिवृत्तये
श्रवणावृत्तिः कार्येत्याह-
शाखाभेदात् कामभेदात् श्रुतं कर्म अन्यथाऽन्यथा।

एवमत्रापि मा शङ्कीत्यतः श्रवणमाचरेत् ॥१०० ॥

शाखेति । यथा शाखाभेदात् कर्मभेदः श्रूयते यदृचा एव हौत्रं क्रियते यजुषा अध्वर्यवं साम्ना उद्गीथम् इति । यथा वा कामभेदात्

यथा शाखाभेदात् कर्मभेदः वर्तते एवं संविद्भेदः न वर्तते ज्ञानस्य एकत्वाद् इत्यर्थः ।

कारीर्या वृष्टिकामो यजेत शतकृष्णलम् आयुष्कामः इत्यादिकर्मभेदः श्रुतः

एवमुपनिषत्स्वपि प्रतिपाद्यतत्त्वस्य भेदशङ्कायां तन्निवारणाय श्रवणं पुनः पुनः कर्तव्यमित्यर्थः ॥१०० ॥

किं तच्छ्रवणम् इत्याकाङ्क्षायां तल्लक्षणमाह –

वेदान्तानाम् अशेषाणाम् आदि-मध्यावसानतः ।

ब्रह्मात्मन्येव तात्पर्यम् इति धीः श्रवणं भवेत् ॥१०१ ॥

वेदान्तानामिति । सर्वासाम् अपि उपनिषदाम् उपक्रमोपसंहारादि-पर्यालोचनायां ब्रह्मरूपे प्रत्यगात्मन्येव तात्पर्यम् इदं पारम्पर्येण पर्यवसानम् इत्येवंरूपो निश्चयः श्रवणम् इत्यर्थः ॥१०१ ॥

एवंविधं श्रवणं कुत्र निरूपितम् इत्यत आह –

समन्वयाध्याये एतत् सूक्तं धीस्वास्थ्यकारिभिः ।

तर्कैः संभावनार्थस्य द्वितीयाध्याये ईरिता ॥१०२ ॥

समन्वयाध्याय इति । एतच्छ्रवणं समन्वयाध्याये सुष्ठूक्तं व्यासादिभिरिति शेषः ।

अर्थ-असंभावना-निवृत्ति-हेतुः मननं तु द्वितीयाध्याये निरूपितम् इत्याह -

धी-स्वास्थ्येति । प्रमेय-गत-अनुपपत्ति-परिहार-द्वारा बुद्धि-स्वास्थ्यकारिभिः तर्कैः युक्ति-शब्द-अभिधेयैः अर्थस्य संभावनासंभावितत्वानुसंधानं मननं द्वितीयाध्याये निरूपितम् इत्यर्थः ॥१०२॥

इदानीं विपरीतभावनां तन्निवृत्त्युपायं च दर्शयति -

बहु-जन्म-दृढाभ्यासाद् देहादिषु आत्मधीः क्षणात् ।

पुनःपुनरुदेत्येवं जगत्सत्यत्वधीरपि ॥१०३॥

बहुजन्मेति ॥३॥

विपरीता भावनेयम् ऐकाग्र्यात् सा निवर्तते ।

तत्त्वोपदेशात् प्रागेव भवत्येतद् उपासनात् ॥१०४॥

विपरीतेति । विपरीत-भावना-निवर्तकं यद् ऐकाग्र्यम् तत्कुतो जायत इत्याशङ्क्याह- तत्त्वेति । एतद् ऐकाग्र्यं ब्रह्मोपदेशात् प्रागेव सगुण-ब्रह्मोपासनाद् भवति भवेदित्यर्थः ॥१०४॥

ननु एतत्कुतोऽवगतम् इत्याशङ्क्य उपासना-विचारस्य वेदान्त-शास्त्रे कृतत्वाद् इत्याह -

उपास्तयोऽत एवात्र ब्रह्म-शास्त्रेऽपि चिन्तिताः ।

प्राग्-अनभ्याशिनः पश्चाद् ब्रह्माभ्यासेन तद्भवेत् ॥१०५॥

उपास्तय इति। अकृतोपास्तिकस्य कुतस्तज्जन्म इत्यत आह -

प्रागिति ॥१०५॥

ब्रह्माभ्यासश्च कीदृश इत्याकाङ्क्षायामाह -

तच्चिन्तनं तत्कथनम् अन्योन्यं तत्प्रबोधनम्।

एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥१०६॥

तच्चिन्तनमिति ॥६॥

एतदेकपरत्वं विशदयितुं बृ ४।४।२० श्रुतिमाह-

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।

नानुध्यायाद् बहून् शब्दान् वाचो विग्लापनं हि तत् ॥१०७॥

तमेवेति। धीरो ब्रह्मचर्यादि-साधन-संपन्नः ब्राह्मणो ब्रह्म भवितुम् इच्छुः मुमुक्षुः तमेव प्रत्यग्रूपं परमात्मानम् एव विज्ञाय संशयाद्यभावो यथा भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मात्मैकत्व-ज्ञान-संतति-रूपम् ऐकाग्र्यं कुर्वीत संपादयेत्। अनात्मगोचरान् बहून् शब्दान् नानुध्यायात् नानुस्मरेत्। ध्यानेन अभिधानम् अप्युपलक्ष्यते नाभिदध्याच्च। अन्यथा शब्दध्यानेन वाग्विग्लापन-अनुपपत्तेः।कुत इत्यत आह - वाच इति। हि

यस्मात्तदभिधानं। अनेन स्मरणम् अप्युपलक्ष्यते। वाच इति मनसोऽप्युपलक्षणम्। विग्लापनं विग्लापयतीति विग्लापनं श्रमहेतुः। अयमभिप्रायः इतरशब्दानुसंधाने मनसः श्रमो भवति तदभिधाने तु वाच इति ॥१०७॥

एवम् ऐकाग्र्यप्रतिपादिकां श्रुतिम् अभिधाय गी ९ २२ स्मृतिम् अप्याह-

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥१०८॥

अनन्या इति। ये जनाः अनन्या अहं ब्रह्मास्मि-इति-ज्ञानेन मद्-अभिन्नाः सन्तः तथैव मां चिन्तयन्तः पर्युपासते परितः सर्वेष्वपि कालेषु उपासते मद्रूपा एव वर्तन्ते तेषां नित्याभियुक्तानां सदा मच्चित्तानां तेषाम् अहं तदात्मत्वेन अनुसंधीयमानः अहं योगक्षेमं अलब्धप्रापण-लब्धपरिरक्षण-रूपौ वहामि संपादयामीत्यर्थः॥१०८॥

उदाहृतयोः श्रुति-स्मृत्योस्तात्पर्यमाह -

इति श्रुतिस्मृती नित्यम् आत्मन्येकाग्रतां धियः।
विधत्तो विपरीताया भावनायाः क्षयाय हि॥१०९॥

इतीति। एते श्रुतिस्मृती विपरीतभावनानिवृत्तये आत्मनि सदा चित्तैकाग्र्यं प्रतिपादयत इत्यर्थः॥१०९॥

ननु देहाद्यात्मत्व-बुद्धेः जगत्-सत्यत्व-बुद्धेश्च कुतो विपरीत-भावनात्वम् इत्याशङ्क्य तल्लक्षण-योगादिति दर्शयितुं तस्या लक्षणमाह -

यद्यथा वर्तते तस्य तत्त्वं हित्वा अन्यथात्वधीः।
विपरीता भावना स्यात् पित्रादौ अरि-धीर्यथा ॥११० ॥

यद्यतेति। यद्वस्तु शुक्त्यादि यथा येन शुक्त्यादिरूपेण वर्तते तस्य तत्त्वं शुक्त्यादिरूपत्वं परित्यज्य अन्यथात्वधीः अन्यथात्वस्य रजतादि-रूपत्वस्य धीः ज्ञानं विपरीत-भावना स्यात्। अतस्मिंस्तद्बुद्धिरिति यावत्। तामुदाहरति - पित्रादाविति ॥११० ॥

उक्तलक्षणं प्रकृते योजयति -

आत्मा देहादिभिन्नोऽयं मिथ्या चेदं जगत्तयोः।
देहाद्यात्मत्व-सत्यत्व-धीर्विपर्यय-भावना ॥१११ ॥

आत्मेति। अयमात्मा वस्तुतो देहादिभ्यो भिन्नः इदम् जगच्च मिथ्या एवं सत्यपि तयोः आत्म-जगतोः यथाक्रमं देहादि-रूपत्वबुद्धिः सत्यत्वबुद्धिश्च या विपरीतभावनेत्यर्थः ॥१११ ॥

पूर्वं एकाग्र्यात् सा निवर्तते प ७ ।१०४ इति सामान्येनोक्तमर्थं विशेषाकारेणाह -

तत्त्वभावनया नश्येत् साऽतो देहातिरिक्तताम्।
आत्मनो भावयेत् तद्वद् मिथ्यात्वं जगतोऽनिशम् ॥११२ ॥

तत्त्वभावनयेति । सा देहाद्यात्मत्व-जगत्सत्यत्व-धीरूपा विपरीता भावना तत्वभावनया आत्मनो देहातिरिक्तत्वस्य जगतो मिथ्यात्वस्य च भावनया निरन्तरध्यानेन नश्येत् । अत आत्मनो देहाद्यतिरिक्तत्वं देहादेः जगतो मिथ्यात्वं च सदा भावयेद् इत्युक्तम् ॥११२ ॥

तत्र जपादौ इव नियम-अपेक्षा अस्ति वा न वा इति पृच्छति -

किं मन्त्रजपवद् मूर्ति-ध्यानवद् वा आत्म-भेद-धीः ।
जगन्मिथ्यात्व-धीश्चात्र व्यावर्त्या स्याद् उत अन्यथा ॥११३ ॥

किं मन्त्रजपवदिति । आत्मभेदधीः आत्मनो देहादिभ्यो विभिन्नज्ञानं जगतो मिथ्यात्व-अनुसंधानं च मन्त्रजपवत् देवता-ध्यानादिवत् किं नियमेन अनुष्ठातव्यं उत लौकिक-व्यवहारवत् नियमम् अन्तरेण अपि कर्तुं शक्यते इति ॥११३ ॥

दृष्टफलकत्वात् नात्र नियमः कश्चिद् अस्तीत्याह -

अन्यथेति विजानीहि दृष्टार्थत्वेन भुक्तिवत् ।
बुभुक्षुः जपवद् भुङ्क्ते न कश्चित् नियतः क्वचित् ॥११४ ॥

अन्यथेति । अन्यथा नियमं विनेत्यर्थः । तत्र हेतुमाह - दृष्टार्थत्वेनेति । तत्र दृष्टान्तमाह - भुक्तिवदिति । दृष्टार्थेऽपि भोजने नियमाः श्रुतिस्मृत्योः उपलभ्यन्ते इत्याशङ्क्य आह - बुभुक्षुरिति । क्षुदपनयनाय भोक्तुमिच्छन् पुरुषो

जपं कुर्वाण इव न नियमेन भुङ्क्ते अपि तु यथा क्षुद्बाधोपशान्तिः स्यात् तथा भोजनं करोतीत्यर्थः ॥११४॥

एतदेव प्रपञ्चयति -

अश्नाति वा न वाऽश्नाति भुङ्क्ते वा स्वेच्छयाऽन्यथा।
येन केन प्रकारेण क्षुधामपनिनीषति ॥११५॥

अश्नातीति। अश्नाति वा अन्ने सति कदाचिद् भुङ्क्ते न वा अश्नाति तस्मिन् असति क्षुद्-बाधा-विस्मारक-द्यूतादि-चेष्टया अनश्नन् एव कालं नयति अन्यथा वा तिष्ठन् गच्छन् शयानो वा स्वेच्छया भुङ्क्ते एवं येन केन प्रकारेण तात्कालिकीं क्षुद्-बाधाम् अपनेतुम् इच्छति। अत्रायमभिसंधिः - क्षुद्-बाधा-निवृत्ति-लक्षण-दृष्ट-फलाय भोजनमेव कार्यं नियमास्तु परलोकहेतव इति ॥११५॥

जपादौ भोजनाद् वैलक्षण्यं दर्शयति -

नियमेन जपं कुर्याद् अकृतौ प्रत्यवायतः।
अन्यथाकरणेऽनर्थः स्वर-वर्ण-विपर्ययात् ॥११६॥

नियमेति। तत्र हेतुमाह - अकृताविति। भवत्वेवम् अकरणे प्रत्यवायश्च अन्यथाकरणे तु स नास्तीत्याशङ्क्याह - अन्यथेति। मन्त्रो हीनः स्वरतः वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् पा शि ५२ इत्युक्तत्वादिति भावः ॥११६॥

ननु क्षुधाया दृष्ट-बाधा-हेतुत्वात् तन्निवृत्तये अनियमेनापि भोक्तव्यम् एव विपरीत-भावनायास्तु तथात्व-अभावात् तन्निवर्तकं ध्यानं अदृष्टफलाय नियमेन अनुष्ठेयम् इत्याशङ्क्याह -

क्षुधेव दृष्ट-बाधाकृद् विपरीता च भावना ।
जेया केनाप्युपायेन नास्त्यत्र अनुष्ठितेः क्रमः ॥११७ ॥

क्षुधेति । विपरीतभावनाया दुःखहेतुत्वस्वानुभवसिद्धत्वादिति भावः ॥११७ ॥

तर्हि स उपायः प्रदर्शनीय इत्याशङ्क्य पूर्वमेव प्रदर्शित इत्याह -

उपायः पूर्वमेवोक्तः तच्चिन्ताकथनादिकः ।
एतदेकपरत्वेऽपि निर्बन्धो ध्यानवन्न हि ॥११८ ॥

उपाय इति । ननु जपवत् प्राङ्मुखत्वादि-नियमो मा भूत् ध्यानवद् एतद्-एक-परत्व-लक्षणैकाग्रता-निर्बन्धः अस्तीत्याशङ्क्याह - एतदिति ॥११८ ॥

ननु ध्यानस्य ध्येय-चिन्ता-मात्रात्मकत्वात् तत्र को निर्बन्ध इत्याशङ्क्य ध्याने निर्बन्धं दर्शयितुं ध्यान-स्वरूपं तावद् आह -

मूर्ति-प्रत्यय-सान्तत्यम् अन्यानन्तरितं धियः ।
ध्यानं तत्र अतिनिर्बन्धो मनसः चञ्चलात्मनः ॥११९ ॥

मूर्तीति । धियो बुद्धेः संबन्धिनां देवतादि-मूर्ति-गोचराणां प्रत्ययानां यत्सान्तत्यम् अविच्छिन्नतया वर्तमानत्वं तद् अन्यानन्तरितम् अन्येन

विजातीय-प्रत्ययेन अव्यवहितं सत् ध्यानम् इत्युच्यते। एवं ध्यान-स्वरूपं निरूप्य तत्र निर्बन्धं दर्शयति तत्रेति। सदा पर्यटन-शीलस्य करि-तुरगादेः एकत्र स्तम्भादौ बन्धने यथा उपरोधो भवति तद्वद् इति भावः ॥११९॥

मनसः चाञ्चल्यादौ गीतावाक्यं ६।३४ प्रमाणयति -

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥१२०॥

चञ्चलं हीति। प्रमाथि प्रमथनशीलं पुरुषस्य व्याकुलत्व-कारणं बलवत् समर्थम् अनिग्राह्यम् इत्यर्थः। दृढं सति असति वा विषये लग्नं तत उद्धर्तुम् अशक्यम् इत्यर्थः। अतः तस्य मनसो निग्रहो वायोः निग्रहः इव सुदुष्करः ॥१२०॥

मनसो दुर्निग्रहत्वे वासिष्ठ-वाक्यमपि प्रमाणयति -

अप्यब्धिपानाद् महतः सुमेरुन्मूलनादपि।
अपि वह्न्यशनात् साधो विषमः चित्त-निग्रहः ॥१२१॥

अपीति ॥१२१॥

प्रकृते ततो वैषम्यं दर्शयति -

कथनादौ न निर्बन्धः शृङ्खला-बद्ध-देहवत्।
किंत्वनन्तेतिहासाद्यैः विनोदो नाट्यवद् धियः ॥१२२॥

कथनादाविति। शृङ्खला-बद्ध-देहस्य यथा निर्बन्धः न तथा कथनादावित्यर्थः। आदि -शब्देन तच्चिन्तनादिकं गृह्यते। न केवलं निर्बन्ध-अभावश्च प्रत्युत धियो विनोद इत्याह - किंत्विति। इतिहासः पूर्वेषां कथा आद्या तेषां लौकिक-कथानुकूल-युक्ति-दृष्टान्त-प्रदर्शनादीनां ते अनन्ता असङ्ख्याताश्च ते इतिहासाद्याश्च इति अनन्तेतिहासाद्याः तैः धियः बुद्धेः विनोदः क्रीडाविषयो भवति। तत्र दृष्टान्तः - नाट्यवदिति। नृत्य-क्रिया-निरीक्षणम् इवेत्यर्थः ॥१२२॥

ननु कथादिभिरपि तदेकपरत्वविघातः स्याद् इत्याशङ्क्याह -

चिदेवात्मा जगन्मिथ्य इत्यत्र पर्यवसाकृतः।
निदिध्यासन-विक्षेपो नेतिहासादिभिर्भवेत् ॥१२३॥

चिदेवेति। इतिहासादीनाम् आत्मा चिन्मात्ररूपो न देहादिरूपः जगच्च मिथ्या इत्येतस्मिन् अर्थे पर्यवसानात् न तैः एतदेकपरत्व-शब्दाभिधेयस्य निदिध्यासनस्य विक्षेप इत्यर्थः ॥१२३॥

ननु इतिहासानाम् अङ्गीकारे कृष्यादेः अपि प्रसक्तिः स्याद् इत्याशङ्क्याह -

कृषि-वाणिज्य-सेवादौ काव्य-तर्कादिकेषु च।
विक्षिप्यते प्रवृत्त्या धीः तैस्तत्त्व-स्मृत्यसंभवात् ॥१२४॥

कृषीति ॥१२४॥

ननु कृष्यादीनां तत्त्वानुसंधान-विघातित्वेन त्याज्यत्वे भोजनादेरपि तथात्वात् तदपि त्याज्यम् एव इत्याशङ्क्याह -

अनुसंदधतैवात्र भोजनादौ प्रवर्तितुम् ।

शक्यतेऽत्यन्त-विक्षेप-अभावादाशु पुनः स्मृतेः ॥१२५॥

अनुसंदधतैवेति । कुत इत्यत आह- अत्यन्तेति । विक्षेपाभावोऽपि कुत इत्यत आह - आशु पुनः स्मृतेरिति ॥१२५॥

ननु तदानीं विक्षेपाभावेऽपि तत्त्व-विस्मृति-सद्भावात् पुरुषार्थ-हानिः स्याद् इत्याशङ्क्याह -

तत्त्वविस्मृति-मात्राद् नानर्थः किंतु विपर्ययात् ।

विपर्येतुं न कालोऽस्ति झटिति स्मरतः क्वचित् ॥१२६॥

तत्त्वविस्मृतीति । कुतस्तर्ह्यनर्थ इत्यत आह - किंतु विपर्ययादिति । विस्मरणे सति विपर्ययोऽपि स्याद् इत्याशङ्क्याह -

विपर्येतुमिति ॥१२६॥

ननु भोजनादिषु प्रवृत्तस्य इव तर्काद्यभ्यास-प्रवृत्तस्यापि तत्त्वस्मरणं किं न स्याद् इत्याशङ्क्याह -

तत्त्व-स्मृतेरवसरो नास्त्यन्याभ्यास-शालिनः ।

प्रत्युत अभ्यास-घातित्वाद् बलात् तत्त्वम् उपेक्ष्यते ॥१२७॥

तत्त्वस्मृतेरिति । न केवलं तत्त्वानुसंधान-अवसर-अभाव एव किन्तु काव्य-तर्काद्याभ्यासस्य ततवाभ्यास-विरोधित्वात् तदानींस्मृतमपि तत्त्वं बलादुपेक्ष्यत इत्याह- प्रत्युतेति ॥१२७॥

तत्त्वानुसंधान-विरोधि-वाग्व्यवहारस्य त्याज्यत्वे प्रमाणत्वेन तमेवैकं जानथ आत्मानम् अन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः मु २।२।५ इति श्रुतिवाक्यम् अर्थतः पठति -

तमेवैकं विजानीथ ह्यन्या वाचो विमुञ्चथ ।
इति श्रुतं तथाऽन्यत्र वाचो विग्लापनं त्विति ॥१२८॥

तमेवेति । नानुध्यायाद् बहून् शब्दान् वाचो विग्लापनं हि तत् बृ ४।४।२९ शात्या २३ इत्येतदपि वाक्यं श्रूयत इत्याह - तथेति ॥१२८॥

ननु तत्त्वानुसंधान-अतिरिक्तम् आहारादि यथा न त्यज्यते एवम् इतर-शास्त्राद्यभ्यासोऽपि क्रियताम् इत्याग्रहं कुर्वाणं प्रत्याह -

आहारादि त्यजन्नैव जीवेत् शास्त्रान्तरं त्यजन् ।
किं न जीवसि येनैवं करोष्यत्र दुराग्रहम् ॥१२९॥

आहारादीति ॥१२९॥

ननु तर्हि जनकादीनां तत्त्वविदाम् अपि कथं राज्य-परिपालनादौ प्रवृत्तिरिति शङ्कते -

जनकादेः कथं राज्यम् इति चेद् दृढबोधतः ।

तथा तवापि चेत् तर्कं पठ यद्वा कृषिं कुरु ॥१३० ॥

जनकादेरिति । दृढापरोक्षज्ञानित्वात् तेषां सा न बाधिकेत्यभिप्रायेण परिहरति ।

तर्हि ममापि दृढ-बोधोऽस्तीति वदन्तं प्रत्याह - तथेति ॥१३० ॥

ननु तत्त्वविदः संसार-असारतां जानन्तः कुतस्तत्र प्रवर्तिष्यन्ते इत्याशङ्क्य

प्रारब्धस्य अवश्यं-भाविफलत्वाद् भोगेन तत्तत्क्षयाय प्रवृत्तिरित्याह -

मिथ्यात्व-वासनादाढर्ये प्रारब्ध-क्षयकाङ्क्षया ।

अक्लिश्यन्तः प्रवर्तन्ते स्वस्व-कर्मानुसारतः ॥१३१ ॥

मिथ्यात्वेति ॥१३१ ॥

तर्हि अनाचारेपि प्रवृत्तिः स्याद् इत्याशङ्क्याह -

अतिप्रसङ्गो मा शङ्क्यः स्वकर्म-वशवर्तिनाम् ।

अस्तु वा केन शक्येत कर्म वारयितुं वद ॥१३२ ॥

अतिप्रसङ्ग इति । प्रारब्धवशाद् एव अतिप्रसङ्गोऽपि स्याद्

इत्याशङ्क्याङ्गीकरोति -अस्त्विति ॥१३२ ॥

ननु ज्ञान्यज्ञानिनोः प्रारब्धकर्मणी अवश्यभोक्तव्यतया समाने तयोः कुतो

वैलक्षण्यसिद्धिः इति आशङ्क्य आह-

ज्ञानिनोऽज्ञानिनश्चात्र समे प्रारब्धकर्मणी ।

न क्लेशो ज्ञानिनो धैर्याद् मूढः क्लिश्यत्यधैर्यतः ॥१३३॥

ज्ञानिन इति ॥१३३॥

तत्र दृष्टान्तं आह -

मार्गे गन्त्रोर्द्वयोः श्रान्तौ स मायाम् अप्यदूरताम्।

जानन् धैर्याद् द्रुतं गच्छेद् अन्यस्तिष्ठति दीनधीः ॥१३४॥

मार्गे इति ॥१३४॥

इत्थं उपपादितम् आत्मानं चेत् बृ ४।४।१२ इति मन्त्रस्य पूर्वार्धार्थं अनुवदन्

फलप्रदर्शनपरं उत्तरार्धं अवतारयति -

साक्षात्-कृतात्म-धीः सम्यग् अविपर्यय-बाधितः।

किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥१३५॥

साक्षादिति। सम्यक् साक्षात्कृतात्मधीः साक्षात्कृतः आत्मा यया सा

साक्षात्कृतात्मा तादृशी धीर्यस्य सः साक्षात् कृतात्मधीः अविपर्यय-बाधितः

विपर्ययेण देहाद्यात्मत्व-बुद्ध्या बाधितो न भवति इति अविपर्यय-बाधितः।

उभयं हेतुगर्भितं विशेषणम् ॥१३५॥

अस्य मन्त्रार्धस्य तात्पर्यम् आह -

जगन्मिथ्यात्व-धीभावाद् आक्षिप्तौ काम्यकामुकौ ॥

तयोरभावे संतापः शाम्येद् निःस्नेहदीपवत् ॥१३६॥

जगन्मिथ्या इति। काम्यं च कामुकश्च काम्यकामुकौ तावाक्षिप्तौ निरस्तौ।
तन्निराकरणे कारणमाह - जगन्मिथ्यात्वेति। ततः किम् इत्यत आह -
तयोरिति। तयोः काम्य-कामुकयोः अभावे संतापः कामना-निमित्तकः
कारण-अभावात् निःस्नेह-दीपवत् शाम्येद् इत्यर्थः ॥१३६॥
काम्य-अभावात् कामना-अभावः क्व दृष्ट इति आशङ्क्य आह -
गन्धर्व-पत्तने किंचिद् नैन्द्र-जालिक-निर्मितम्।
जानन् कामयते किंतु जिहासति हसन्-इदम् ॥१३७॥
गन्धर्वेति। मायावि-निर्मिते पत्तने स्थितं वस्तु किंचिदपि इदम् ऐन्द्र-जालिक-
निर्मितं इति जानन् न कामयते। न केवलं कामना-अभावः प्रत्युत इदम्
अनृतम् इति हसन् जिहासति परित्यक्तुं इच्छति ॥१३७॥
दार्ष्टान्तिके योजयति -
आपात-रमणीयेषु भोगेष्वेवं विचारवान्।
नानुरज्यति किम्त्वेतान् दोषदृष्ट्या जिहासति ॥१३८॥
आपातेति। एवम् आपात-रमणीयेषु प्रतीति-मात्र-रम्येषु भोगेषु भुज्यन्त इति
भोगा विषयाः स्रक्-चन्दन-वनितादयः तेषु एवं विचारवान् आपात-
रमणीयत्व-अनुसंधानवान् न अनुरज्यति न आसक्तिं करोति किंतु दोष-दर्शनेन
एतान् परित्यक्तुम् इच्छति ॥१३८॥

के ते विषयदोषा इत्यत आह –

अर्थानाम् अर्जने क्लेशः तथैव परिपालने ।

नाशे दुःखं व्यये दुःखं धिगर्थान् क्लेश-कारिणः ॥१३९॥

अर्थानामिति ॥१३९॥

एवं विषयाणां दुःख-हेतुत्वं प्रदर्श्य अशोभनत्वं क्वचित् दर्शयति मांस-

इत्यादि-श्लोक-द्वयेन –

मांस-पाञ्चालिकायास्तु यन्त्रलोलेऽङ्गपञ्जरे ।

स्नाय्वस्थि-ग्रन्थि-शालिन्याः स्त्रियाः किमिव शोभनम् ॥१४०॥

स्नायवः शिराश्च अस्थीनि प्रसिद्धानि ग्रन्थयो मांस-निचयरूप-नितम्ब-

स्तनादयः एतैश्च सहिते मांसपाञ्चालिकायाः पुत्तलिकाया योषितो यन्त्रलोले

यन्त्रवत् चञ्चलशीले अङ्गपञ्जरे अङ्गान्येव पञ्जरं नीडं तस्मिन् शरीरे किं शोभनम्

इव । न किमपि इत्यर्थः ॥१४०॥

एवमादिषु शास्त्रेषु दोषाः सम्यक् प्रपञ्चिताः ।

विमृशन् अनिशं तानि कथं दुःखेषु मज्जति ॥१४१॥

एवमादिषु इति । आदि-शब्देन त्वङ्-मांस-रक्त-बाष्पाम्बु पृथक् कृत्वा

विलोचने । समालोकय रम्यं चेत् किं मुधा परिमुह्यसि ॥ याज्ञ उप ६

इत्येवमादयः गृह्यन्ते ॥१४१॥

विषय-दोष-दर्शने सति भोगेच्छाऽभावे युक्तिसहितं दृष्टान्तम् आह -

क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुम् इच्छति ।

मिष्टान्न-ध्वस्त-तृड् जानन् नामूढस्तद् जिघत्सति ॥१४२ ॥

क्षुधयेति । स्वयम् अमूढः विवेकी मिष्टान्न-भोजनेन ध्वस्ता विनष्टा तृट् तृष्णा आकाङ्क्षा यस्य सः तथोक्तः इदं विषम् इत्येवं जानन् तद्विषं न जिघत्सति नात्तुम् इच्छति इत्यर्थः ॥१४२ ॥

ननु प्रारब्धकर्मणः प्रबलत्वात् ज्ञानिनः अपि इच्छा भवेत् इति आशङ्क्य सत्याम् अपि इच्छायां प्रीतिपुरःसरं न भुङ्क्ते इति आह -

प्रारब्ध-कर्म-प्राबल्यात् भोगेष्विच्छा भवेद् यदि ।

क्लिश्यन्नेव तदाप्येषः भुङ्क्ते विष्टि-गृहीतवत् ॥१४३ ।

प्रारब्धेति ॥१४३ ॥

कथं एतत् अवगम्येत इति आशङ्क्य लोकदर्शनात् इति आह -

भुञ्जाना वा अपि बुधाः श्रद्धावन्तः कुटुम्बिनः ।

नाद्यापि कर्म नः छिन्नम् इति क्लिश्यन्ति संततम् ॥१४४ ॥

भुञ्जाना वै इति ॥१४४ ॥

ननु तत्त्व-विदां संसार-निमित्तकः तापः अनुपपन्नः ज्ञान-वैयर्थ्य-आपातात् इति आशङ्क्याह -

नायं क्लेशोऽत्र संसार-तापः किंतु विरक्तता ।

भ्रान्ति-ज्ञान-निदानो हि तापः सांसारिकः स्मृतः ॥१४५॥

नायम् इति । अयं क्लेशः नाद्यापि कर्म नः छिन्नं इत्येवम् अनुतापात्मकः संसार-तापः न भवति । किंतु अत्र संसारे विरक्तता आसक्ति-रहितता । तापकत्व-अभावे युक्तिं आह - भ्रान्तीति । हि यस्मात् कारणात् सांसारिकः तापः भ्रान्ति-ज्ञान-निदानः भ्रान्ति-ज्ञान-करणकः स्मृतः पूर्वाचार्यैः अयं तु विवेक-ज्ञान-मूलत्वात् न तथाविध इत्यर्थः ॥१४५॥

अयं क्लेशः विवेकमूलः अविवेकमूलः वा इति कुतो अवगम्यत इति आशङ्क्य कामनिवर्तकत्वात् विवेकमूल इति आह -

विवेकेन परिक्लिश्यन् अल्पभोगेन तृप्यति ।

अन्यथाऽनन्त भोगेऽपि नैव तृप्यति कर्हिचित् ॥१४६॥

विवेकेन इति ॥१४६॥

विवेकिन इव अविवेकिन अपि भोगेन एव तृप्तिः स्यात् अतः विवेकः अप्रयोजकः इत्याशङ्क्य भोगस्य तृप्ति-हेतुत्व-अभाव-प्रतिपादिकां श्रुतिं नार परि ३।३७ पठति -

न जातु कामः कामानाम् उपभोगेन शाम्यति ।

हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥१४७॥

गीतावाक्यं अ ३।३३ पठति-

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।

प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥१५५॥

सदृशमिति। विवेकज्ञानवान् अपि पुरुषः स्वस्याः स्वकीयायाः प्रकृतेः सदृशम् अनुरूपं चेष्टते। प्रकृतिर्नाम पूर्वकृत-धर्म-अधर्मादि-संस्कारः वर्तमानजन्मादौ अभिव्यक्तः ज्ञानवानपि किं पुनः मूर्खः तस्मात् प्रकृतिं यान्ति भूतानि निग्रहः प्रवृत्ति-निवृत्त्योः निरोधः मया अन्येन वा कृतः किं करिष्यति। न किमपि इत्यर्थः ॥१५५॥

तीव्र-प्रारब्धस्य अपरिहार्यत्वे वचनान्तर-संमतिम् आह-

अवश्यंभावि-भावानां प्रतीकारो भवेद्यदि।

तदा दुःखैर्न लिप्येरन् नल-राम-युधिष्ठिराः ॥१५६॥

अवश्यमिति। अवश्यंभाविनां भावानां दुःखादीनाम् इत्यर्थः ॥१५६॥

प्रारब्धस्य अपरिहार्यत्वे तत्परिहार-असमर्थस्य ईश्वरस्य अनीश्वरत्वप्रसङ्ग इति आशङ्क्य आह -

न चेश्वरत्वमीशस्य हीयते तावता यतः।

अवश्यंभाविताऽप्येषाम् ईश्वरेणैव निर्मिता ॥१५७॥

न चेश्वरत्वमिति। कुत इत्यत आह - यत अवश्यमिति। यतः कारणात् एषा दुःखादीनां अवश्यंभावितापि ईश्वरेणैव निर्मिता अतः न अनीश्वरप्रसङ्गः इत्यर्थः ॥१५७॥

एवं सप्रपञ्चम् इच्छाप्रारब्धं अभिधाय अनिच्छाप्रारब्धं वक्तुम् आरभते -

प्रश्नोत्तराभ्यामेवैतत् गम्यतेऽर्जुनकृष्णयोः।

अनिच्छापूर्वकं चास्ति प्रारब्धमिति तच्छृणु ॥१५८॥

प्रश्नोत्तराभ्याम् इति। अनिच्छापूर्वकं च प्रारब्धम् अस्तीति एतत् अर्जुनकृष्णयोः प्रश्नोत्तराभ्याम् एव गम्यते ज्ञायत इति योजना। तदभिधानाय शिष्यम् अभिमुखीकरोति - तत् शृणु इति ॥१५८॥

तत्र अर्जुनस्य प्रश्नं गी ३।३६ तावत् दर्शयति -

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।

अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥१५९॥

अथ केनेति। हे वार्ष्णेय वृष्णिसंबन्धिन् अयं पुरुषः केन प्रयुक्तः प्रेरितः अनिच्छन् इच्छाम् अकुर्वन् अपि राज्ञा बलात् नियोजित इव पापं चरति आचरति इति ॥१५९॥

श्रीकृष्णस्य उत्तरम् आह- गी ३।३७

काम एष क्रोध एष रजोगुणसमुद्भवः।

महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥१६० ॥

काम इति । एष पुरुष-प्रवर्तकः रजोगुणात् समुद्भव उत्पत्तिः यस्य सः रजोगुणसमुद्भवः कामः एष प्रसिद्धः अयं कामः कदाचित् क्रोधरूपेण अपि परिणमते ततः क्रोधः । स पुनः कीदृशः । महाशनः महद् अशनं विषयजातं यस्य सः महाशनः । महापाप्मा महतः पापस्य हेतुत्वात् उपचारात् महापाप्मत्वम् अस्य । अत इह संसारे एनं कामक्रोधरूपिणं वैरिणं विद्धि । अयम् अभिप्रायः- प्रारब्धवशात् उद्रिक्त-रजोगुणकार्ययोः कामक्रोधयोः अन्यतरस्य एव पुरुषप्रवर्तकत्वं न प्रवृत्तिः इच्छाया इति ॥१६० ॥

ननु अत्र कामक्रोधयोः एव पुरुषप्रवर्तकत्वम् उपलभ्यते न अनिच्छाप्रारब्धस्य इति आशङ्क्य तस्यैव प्रवर्तकत्व-प्रतिपादकं तद्वाक्यं गी १८ ।६० पठति -

स्वभावजेन कौन्येय निबद्धः स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत् ॥१६१ ॥

स्वभावजेन इति । हे कौन्तेय । स्वेनैव अनुष्ठितेन अत एव स्वकीयेन प्रारब्धेन कर्मणा निबद्धः सन् यत्कर्तुं न इच्छसि तदपि मोहात् अविवेकतः अवशः परवशः करिष्यसि इति । अतः अनिच्छाप्रारब्धम् अस्ति इति अभ्युपगन्तव्यम् इति भावः ॥१६१ ॥

इदानीं परेच्छाप्रारब्धं अस्ति इति आह -

नानिच्छन्तो न चेच्छन्तः परदाक्षिण्यसंयुताः।

सुखदुःखे भजन्त्येतत् परेच्छापूर्व-कर्म हि ॥१६२॥

नानिच्छन्त इति। अनिच्छन्तः अपि न भजन्ति इच्छन्तः अपि न भजन्ति किंतु परदाक्षिण्यसंयुताः सन्तः तत्प्रीत्यर्थमेव सुखदुःखे अनुभवन्ति। अत एतत् सुखादि-भोगहेतुभूतं परेच्छापूर्वकं प्रारब्धं प्रसिद्धम् इत्यर्थः। अत एव दोषदर्शने सत्यपि प्रारब्धस्य अपरिहारत्वात् अस्य इच्छाजनकत्वं न निवारयितुं शक्नोति इति भावः ॥१६२॥

ननु तत्त्वविदः अपि इच्छाङ्गीकारे किमिच्छन् इति श्रुतिविरोध इति शङ्कते -

कथं तर्हि किमिच्छन्निति एवम् इच्छा निषिध्यते।

नेच्छानिषेधः किंत्विच्छा-बाधो भर्जितबीजवत् ॥१६३॥

कथं तर्हीति। किमिच्छन् इति अनेन वाक्येन कथं इच्छाऽभावो वर्णित इत्यर्थः। न अनेन इच्छाऽभावः अभिधीयते किंतु सत्या अपि तस्याः समर्थप्रवृत्तिजनकत्वं नास्तीति बोध्यत इति परिहरति - न इच्छानिषेध इति। स्वरूपेण सत्या अपि तस्याः सामार्थ्यराहित्ये दृष्टान्तं आह - भर्जितेति ॥१६३॥

संक्षेपणोक्तमर्थं प्रपञ्चयति -

भर्जितानि तु बीजानि सन्त्यकार्यकराणि च।

विद्वदिच्छा तथेष्टव्याऽसत्त्वबोधान्न कार्यकृत् ॥१६४॥

भर्जितानीति । यथा भर्जितानि बीजानि स्वयं स्वरूपेण विद्यमानानि अपि न अङ्कुरादिकार्यकराणि भवन्ति तथा विद्वदिच्छा स्वयं विद्यमाना अपि इष्यमाणपदार्थस्य असत्वज्ञानेन बाधितत्वात् न व्यसनादिकार्यक्षंआ इत्यर्थः ॥१६८ ॥

ननु तर्हि विदुष इच्छैव न अङ्गीकर्तव्या फल-अभावात् इत्याशङ्क्य फल-अभावः असिद्धः भोग-लक्षणफलसद्भावात् इति सदृष्टान्तम् आह -

दग्धबीजमरोहेऽपि भक्षणायोपयुज्यते ।

विद्वदिच्छाऽप्यल्पभोगं कुर्यान्न व्यसनं बहु ॥१६५ ॥

दग्धबीजमिति । दग्धं भर्जितम् इति यावत् । व्यसनं विपदादिरूपं बहुविधम् । व्यसनं विपदि भ्रंशे दोषे कामज-कोपजे

इत्यभिधानात् ॥१६५ ॥

ननु कर्मैव भोगद्वारा व्यसनमपि जनयेत् इति आशङ्क्य आह-

भोगेन चरितार्थत्वात् प्रारब्धं कर्म हीयते ।

भोक्तव्यसत्यताभ्रान्या व्यसनं तत्र जायते ॥१६६ ॥

भोगेनेति ।प्रारब्धकर्मणः भोगमात्रहेतुत्वात् न व्यसनजनकत्वं इत्यर्थः । कुतः तर्हि व्यसनजन्म इत्यत आह-भोक्तव्येति । तत्र तस्मिन् विषये ॥१६६ ॥

व्यसनेषु भ्रमं दर्शयति

मा विनश्यत्वयं भोगः वर्धतामुत्तरोत्तरम् ।

मा विघ्नाः प्रतिबध्नन्तु धन्योऽस्म्यस्मादिति भ्रमः ॥१६७ ॥

मा विनश्यतु इति । अयं भोगः मा विनश्यतु एष उत्तरोत्तरं वर्धतां विघ्नाः च एनं मा प्रतिबध्नातु अस्य प्रतिबन्धं मा कुर्वन्तु अस्मात् एव भोगात् अहं धन्यः कृतार्थः अस्मि इति एवं रूपः भ्रमः भवति ततश्च व्यसनं इत्यर्थः ॥१६७ ॥

प्रसङ्गात् अस्य परिहार- उपायं आह-

यदभावि न तद्भावि भावि चेन्न तदन्यथा ।

इति चिन्ताविषघ्नोऽयं बोधो भ्रमनिवर्तकः ॥१६८ ॥

यदभावीति ।यद्भवितुं अयोग्यं तन्न भवेत् एव भवितुं योग्यं चेत् तत् अन्यथा न भवेत् एव इत्येवंरूपः चिन्ताविषयघ्नः इदं मे श्रेयः कदा भविष्यति इदं अनिष्टं कदा निवर्तिष्यते इत्येवमादिचिन्तैव विषमिव स्वसंसृष्टपुरुषस्य नाशहेतुत्वात् विषं इदं चिन्ताविषं हन्तीति चिन्ताविषघ्नः एवंभूतः यो बोधः सोऽयं भ्रमनिवर्तकः पूर्वोक्तभ्रमस्य निवर्तक इत्यर्थः ॥१६८ ॥

ननु कर्मैव भोगद्वारा व्यसनमपि जनयेत् इति आशङ्क्य आह -

भोगेन चरितार्थत्वात् प्रारब्धं कर्म हीयते ।

भोक्तव्य-सत्यता-भ्रान्त्या व्यसनं तत्र जायते ॥१६६ ॥

भोगेनेति । प्रारब्धकर्मणः भोगमात्रहेतुत्वात् न व्यसनजनकत्वम् इत्यर्थः । कुतः तर्हि व्यसनजन्म इत्यत आह - भोक्तव्येति । तत्र तस्मिन् विषये ॥१६६ ॥

व्यसनेहेतुं भ्रमं दर्शयति -

मा विनश्यत्वयं भोगः वर्धतामुत्तरोत्तरम् ।
मा विघ्नाः प्रतिबध्नन्तु धन्योऽस्मि अस्मादिति भ्रमः ॥१६७ ॥

मा विनश्यतु इति । अयं भोगः मा विनश्यतु एष उत्तरोत्तरं वर्धतां विघ्नाः च एनं मा प्रतिबध्नन्तु अस्य प्रतिबन्धं मा कुर्वन्तु अस्मात् एव भोगात् अहं धन्यः कृतार्थः अस्मि इति एवं रूपः भ्रमः भवति ततश्च व्यसनं इत्यर्थः ॥१६७ ॥

प्रसङ्गात् अस्य परिहार-उपायम् आह -

यदभावि न तद्भावि भावि चेन्न तदन्यथा ।
इति चिन्ताविषघ्नोऽयं बोधो भ्रमनिवर्तकः ॥१६८ ॥

यदभावीति । यद्भवितुम् अयोग्यं तन्न भवेत् एव भवितुं योग्यं चेत् तत् अन्यथा न भवेत् एव इत्येवंरूपः चिन्ताविषघ्नः इदं मे श्रेयः कदा भविष्यति इदम् अनिष्टं कदा निवर्तिष्यते इत्येवमादि-चिन्तैव विषमिव स्वसंसृष्ट-पुरुषस्य नाशहेतुत्वात् विषं इदं चिन्ताविषं हन्तीति चिन्ताविषघ्नः एवंभूतः यो बोधः सोऽयं भ्रमनिवर्तकः पूर्वोक्तभ्रमस्य निवर्तक इत्यर्थः ॥१६८ ॥

ननु विद्वत् अविदुषः उभयोरपि भोगित्व-अविशेषे एकस्य व्यसनं अपरस्य तु तत् न इति एतत् कुत इति आशङ्क्य विपरीतज्ञान-सत्त्व-असत्त्वाभ्यां तत्सिद्धिः इति आह -

समेऽपि भोगे व्यसनं भ्रान्तो गच्छन्न बुद्धवान्।
अशक्यार्थस्य संकल्पात् भ्रान्तस्य व्यसनं बहु ॥१६९॥

समेऽपीति। बुद्धवान् ज्ञानवान् ज्ञानी इत्यर्थः। भ्रान्तेः कथं व्यसनहेतुत्वम् इत्यत आह - अशक्यवार्थस्य इति ॥१६९॥

विवेकिनः तदभावं दर्शयति -

मायामयत्वं भोगस्य बुद्ध्वाऽऽस्थामुपसंहरन्।
भुञ्जानोऽपि न संकल्पं कुरुते व्यसनं कुतः ॥१७०॥

मायामयत्वमिति ॥१७०॥

ननु मायामयत्वबोधे सत्यपि भोगस्य तदानीन्तन-सुखहेतुत्वात् कुत आस्थोपसंहार इत्याशङ्क्य बहुविध-दोषदर्शनात् इत्याह -

स्वप्नेन्द्रजालसदृशं अचिन्त्यरचनात्मकम्।
दृष्टनष्टं जगत्पश्यन् कथं तत्रानुरज्यति ॥१७१॥

स्वप्नेन्द्रेति ॥१७१॥

ननु उक्तस्वप्नेन्द्रजालसादृश्यादिविज्ञाने सत्यासक्तिभावो न भवेत् तदेव कुतो जायते इत्याशङ्क्य तज्जन्मोपायमाह - श्लोकद्वयेन। स्वकीयस्वप्नम् अपरोक्षतया दृष्ट्वा स्वकीयं च जागरमनुभवन् स्वप्नजागरावुभावपि अप्रमत्तः सन्मुहुः चिन्तयेत् स्वप्नतुल्योयं जागर इति। एवं तयोः स्वप्नजागरयोः सर्वसाम्यं तात्कालिक-भोग-हेतुत्व-परिणतिविरसत्व-विनाशित्वादिलक्षणं चिरम् अनुसन्धाय जागरे अपि सत्यत्वबुद्धिं परित्यज्य जाग्रद्वस्तुष्वपि पूर्ववत् जगत्सत्यत्वज्ञानदशायामिव नानुरज्यति अनुरक्तो न भवति इत्यर्थः। १७२-१७३

एवं विभिन्नविषयत्वं प्रदर्श्य प्रयोगमाह- विद्येति। विद्याप्रारब्धकर्मणी परस्परं न विरुध्येते विभिन्नविषयत्वात् संप्रतिपन्नरूपरसज्ञानवदित्यर्थः। भोग्यमिथ्यात्वाज्ञानं भोगबाधकं न भवतीत्येतत् क्व दृष्टमित्याशङ्क्याह- जानद्भिरिति। ऐन्द्रजालविनोद इन्द्रजालसंबन्धिचमत्कारविशेषः जानद्भिरपीन्द्रजालं जानद्भिरपि अवलोक्यते इति प्रसिद्धमित्यर्थः ॥१७६॥
किंच विद्याप्रारब्धकर्मणोः विरोधः अस्तीति वदन् प्रष्टव्यः किं प्रारब्धकर्म विद्याविरोधीत्युच्यते उत विद्या प्रारब्धकर्मविरोधिनीति। नाद्य इत्याह- जगदिति। प्रारब्धं कर्म जगतो भोग्यजातस्य सत्यत्वमबाध्यत्वमापाद्य संपाद्य यदि भोजयेज्जीवस्य सुखदुःखे दद्यात्तदा विद्याविषयस्य मिथ्यात्वस्य

अपहाराद्विद्याया विरोधि स्यात् न च तथा करोति किंतु भोगमेव प्रयच्छति। अतो न विद्याविरोधि प्रारब्धमिति भावः। भोगबलादेव भोग्यस्य सत्यत्वमपि स्यादित्याशङ्क्याह- भोगमातादिति। विमतं जगत् सत्यं भोग्यत्वादित्यत्र दृष्टान्ताभाव इति भावः ॥१७७ ॥

ननु मिथ्यापदार्थैः भोगः भवतीत्यत्रापि दृष्टान्तः नास्तीत्याशङ्क्याह- अनून इति ॥१७८ ॥

नापि द्वितीय इत्याह- यदि विद्येति। विद्या यदि जगद्भोग्यजातमह्नुवीत नेदम् रजतमिति निषेधक ज्ञानवत्प्रतीयमानस्य भोग्यस्य स्वरूपम् विलापयेत् तदा प्रारब्धकर्मभोगस्य सुखदुःखानुभवस्य साधनापहारेण प्रारब्धकर्मविघातिनी स्यात्। न च तत्करोति किंतु मिथ्यात्वमेव बोधयति। अतो न प्रारब्धकर्मविरोधिनीति भावः। ननु मिथ्यात्वबोधनादेव स्वरूपमपि विलापयेदित्याशङ्क्याह- ननु मायेति। इन्द्रजालादौ स्वरूपविलापमन्तरेणापि मिथ्यात्वज्ञानदर्शनादिति भावः ॥१७९ ॥

एतदेव प्रपञ्चयति- अनपह्नुत्येति। लोका जनास्तदिन्द्रजालस्वरूपमनपह्नुत्यानिरस्य इदमिन्द्रजालमिति जानन्येव यथा तथा भोगं भोग्यमनपह्नुत्याविलाप्य मायात्वधीः। ज्ञानं भवतीत्यर्थः ॥१८० ॥

यत्र त्वस्य सर्वमात्मैवाभूतत्केन कं पश्येत् इत्यादि श्रुतिः द्रष्टृदर्शनदृश्याभावं बोधयत्यतः विद्योत्पद्यमाना जगद्विलापयेदेव। एवं सति विदुषो भोगश्च कथं स्यादिति श्रुत्यवष्टम्भेन शङ्कते श्लोकद्वयेन - यत्र त्वित्यादिना। यत्र तस्या विद्यावस्थायां कृत्स्नं जगदस्य विदुषः स्वात्मैवाभूत् इदं सर्वं यदयमात्मा इति ज्ञानेन स्वरूपमेव भवति तत्र तस्यां दशायां को द्रष्टा केन साधनेन चक्षुषा किं दृश्यं रूपजातं पश्येत्। एवं घ्राणलक्षणेन किं कुसुमादिकं जिघ्रेत् किं वाक्यं केन वागिन्द्रियेण वा वदेत्। एवमितरेन्द्रियव्यापाराभावद्योतनाय वा शब्दः। इत्येवंप्रकारेण श्रुतौ बहुवारमभिहितमित्यर्थः ॥१८१॥

स्वाप्ययः सुषुप्तिः सम्पत्ति : मुक्तिरित्यर्थः ॥८३॥

अस्याः श्रुतेः सुषुप्त्यादिविषयत्वानङ्गीकारे बाधकमाह- अन्यथेति। तत्रोपपत्तिमाह- द्वैतेति। याज्ञवल्क्यादिर्यदि द्वैतम् पश्येत्तर्हि तदाऽद्वैतज्ञानाभावान्नाचार्यो भवेत्। अत द्वैतं न पश्यति तर्हि बोध्यशिष्याद्यनुपलम्भादाचार्यवाक् शिष्यं प्रति बोधनाय न प्रवर्तेत। अतो विद्यासम्प्रदायोच्छेदप्रसङ्ग इति भावः। १८४॥

ननौ याज्ञवल्क्यादीनामाचार्यत्वदशायां विद्यमानस्य ज्ञानस्य विद्यात्वम्स्त्येव तथापि तस्य नापरोक्षविद्यात्वं द्वैतप्रतीतिसद्भावात् निर्विकल्पकसमाधौ तु द्वैतदर्शनाभावात्सैवापरोक्षविद्येति शङ्कते -

निर्विकल्पेति। द्वैताप्रतीतेरप्यतिप्रसङ्गापादकत्वान्मैवमिति परिहरति- सुषुप्तिस्तथा न किमिति ॥१८५॥

अतिप्रसङ्गपरिहारं शङ्कते- आत्मतत्त्वमिति। द्वैतदर्शनाभावेऽपि आत्मगोचरज्ञानाभावान्न विद्यात्वं तस्या इत्यर्थः। तर्हि प्राप्तं विवेकज्ञानस्यैव विद्यात्वं न द्वैतदर्शनाभावस्येत्याह- तदेति ॥१८६॥

ननु द्वैतदर्शनात्मज्ञानयोर्मिलितयोरेव विद्यात्वं नैकैकस्येति शङ्कते- उभयमिति। द्वैतविस्मृतेरपि विद्यांशत्वाङ्गीकारे जडस्याप्यर्धविद्यात्वप्रसङ्ग इति परिहरति- तर्हि घटादय इति। अत्रोपपत्तिमाह- सकलेति ॥१८७॥

अस्मिन्नेव पक्षे समाधिमतां पुरुषाणां अर्धविद्यावत्त्वमपि न स्यादिति सोपहासमाह- मशकध्वनीति। घटादीनां यथा द्वैतविस्मरणं दृढं तथा तव समाधौ द्वैतविस्मरणं न संभवति मशकध्वन्यादीनामनेकेषां विक्षेपाणां सद्भावादित्यर्थः॥ १८८॥

उभयात्मकः इति। यत एकैकस्य भोक्तृत्वं न संभवति अत उभयात्मकः साधिष्ठानचिदाभास एव लोके व्यवहारदशायां भोक्तेत्यभिधियते

परमार्थतस्तूभयात्मकस्वमेव न घठत इति भावः। ननु असङ्गो हयं पुरुषः बृ ४।३।१ इत्यादौ असङ्गत्वस्येव योऽयं विज्ञानमयः प्राणेषु बृ ४।३।७ इत्यादौ बुद्धिसाक्षित्वस्यापि श्रवणादुभयात्मकं भोक्तुस्वरूपमपि पारमार्थिकमेव स्यात् न लोकव्यवहारमात्रसिद्धिमित्याशङ्क्य श्रुतेस्तत्र तात्पर्याभावान्मैवमित्याह - तादृगिति। तादृगात्मानं बुद्ध्युपाधिकं म्होक्तारमात्मानमरभ्य अनूद्य कूटस्थः बुद्धादिकल्पनाधिष्ठनभूतश्चिदात्मा शेषितः बुद्धाधनात्मनिरसनेन परिशेषितः श्रुतौ बृहदारण्यकादावित्यर्थैः॥ १९७॥

तत्र बृहदारण्यकवाक्यार्थ तावत्संक्षिप्य दर्शयति-

आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयन्।
विज्ञानमयमारभ्यासङ्गं तं पर्यशेषयत्॥ १९८॥

आत्मेति। जनकेन कतम आत्मा बृ ४।३।७ इत्येवमात्मनि पृष्टे सति याज्ञवल्क्यस्तं विबोधयन् योऽयं विज्ञानमयः प्राणेषु बृ ४।३।७ इतयादिना विज्ञानमयमुप भ्य असङ्गे ह यं पुरुषः बृ ४।३।१५ इत्यसङ्गं कूटस्थं परिशेषितवानित्यर्थः॥ १९८॥

एवं बृहदारण्यके असङ्गःत्मपरिशेषप्रकारं प्रदय ऐतरेयादि-श्रुत्यन्तरेष्वपि तदृर्शयति

कोऽयमात्मेत्येवमादौ सर्वत्रात्मविचारतः।

उभयात्मकमारभ्य कूट्स्थः शेष्यते श्रुतौ ॥ १९९ ॥

कोऽयमात्मेति । वयमुपास्महे कतरः स आत्मा ऐ ४ ।३ ।१ इत्येवमादौ आत्मविचारेणान्तःकरणोपाधिकमात्मानमारम्य प्रज्ञानमात्रात्मकः कूटस्थः परिशेषितः । एवमन्यत्रापि द्रष्टव्यम् । एवमुक्तश्रुतिपर्यालोचनायामुभयात्मकस्य भोक्तुर्मिथ्यात्वं पारमार्थिकस्यासङ्गस्य कूटस्थस्य अभोक्तृत्वं च सिद्धम् ॥१९९ ॥

ननूक्तरीत्या भोक्तुर्मिथ्यात्वे प्राणिनां तस्मिन्सत्यत्वबुद्धिः कुतो जयते इत्याशङ्क्याह -

कूटस्थसत्यतां स्वस्मिन् अध्यस्यात्माविवेकतः ।
तात्त्विकीं भोक्तृतां मत्वा न कदाचित् जिहासति ॥ ७ २०० ॥

कूटस्थसत्यतां स्वस्मिन् अध्यस्यात्माविवेकतः । तात्त्विकीं भोक्तृतां मत्वा न कदाचित् जिहासति ॥ ७ २०० ॥

कूटस्थ इति । आत्मा लोकप्रसिद्धः भोक्ता अविवेकतः स्वस्य कूटस्थात् विवेकज्ञान-अभावेन कूटस्थनिष्ठं सत्यत्वं आत्मनि अध्यस्य तद्द्वारा स्वनिष्ठस्य भोक्तृत्वस्यापि सत्यतां मत्वा योगं कदाचित् अपि न हातुम् इच्छति ॥२०० ॥

ननु तर्हि आत्मनस्तु कामाय सर्वं प्रियं भवति बृ २ ।४ ।५ इति आत्मशेषत्वं भोग्यस्य कथं प्रतिपाद्यत इति आशङ्क्य न कूटस्थ-आत्म-शेषत्वं प्रतिपाद्यते किंतु लोकप्रसिद्ध-उभयात्मक-भोक्तृ-शेषत्वं एव श्रुत्या अनूद्यत इति आह-

भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति ।

एष लौकिक-वृत्तान्तः श्रुत्या सम्यक्-अनूदितः ॥२०१॥

भोक्तेति । लोके यः भोक्ता सः स्वस्यैव भोगाय पतिजायादि-भोग-उपकरणम् इच्छति इति अयं लौकिक-वृत्तान्तः श्रुत्या सम्यक्-अनूदितः न अर्थान्तरं प्रतिपाद्यत इत्यर्थः ॥२०१॥

अनुवादः किमर्थम् इति आशङ्क्य भोक्तरि एव प्रेम्णः विधानायेत्याह्-

भोग्यानां भोक्तृशेषत्वात् मा भोग्येषु अनुरज्यताम् ।

भोक्तर्येव प्रधाने अतः अनुरागं तं विधित्सति ॥२०२॥

भोग्यानां इति ।भोग्यानां पतिजायादीनां भोक्तुः स्वस्य भोग-उपकरणत्वात् भोग्येषु अनुरागः न कर्तव्यः किंतु प्रधानभूत भोक्तरि एव अनुरागः कर्तव्य इति विधानाय इत्यर्थः ॥२०२॥

भोग्येषु प्रेमत्यागपुरःसरम् आत्म-प्रेम-कर्तव्यतायां दृष्टान्तत्वेनेश्वरे प्रेम-प्रार्थना-पुरःसरं पुराणवचनम् उदाहरति-

या प्रीतिः अविवेकानां विषयेषु अनपायिनी ।

त्वां अनुस्मरतः सा मे हृदयात् मा अपसर्पतु ॥२०३॥

या प्रीतिरिति । अविवेक- नाम आत्मज्ञान-शून्यानां विषयेषु अनपायिनी दृढा या प्रीतिः अस्ति हे माप लक्ष्मीपते । सा प्रीति त्वाम् अनुस्मरतः त्वां सदा

चिन्तयतः मे हृदयात् मनसः सर्पतु अपगच्छतु मम मनो विषयेषु आसक्तिं परित्यज्य त्वयि एव सदा तिष्ठतु इत्यर्थः ।यद्वा - अविवेकिनां विषयेषु दृढा या यादृशी प्रीतिः अस्ति सा तादृशी विषयेषु विद्यमाना प्रीतिः त्वाम् अनुस्मरतः मे हृदयात् मा अपसर्पतु मा अपगच्छतु सदा तिष्ठतु इत्यर्थः ॥२०३॥

भवतु एवं पुराणे श्रुतौ किं आयातं इत्यत आह-

इति न्यायेन सर्वस्मात्-भोग्यजातात्-विरक्तधीः ।

उपसंहृत्य तां प्रीतिं भोक्तः एनं बुभुत्सते ॥२०४॥

इति न्यायेन इति ।इति अनेन पुराणोक्त-न्यायेन सर्वस्मात् भोग्यजातात् पतिजायादिलक्षणात् विरक्तधीः विरक्ता धीर्यस्य असौ विरक्तधीः पुरुषः तां भोग्यगोचरां प्रीति भोक्तरि आत्मनि उपसंहृत्य एनम् आत्मानं बुभुत्सते बोद्धुम् इच्छति ॥२०४॥

एवम् आत्मनि एव प्रेम-उपसंहारे फलितं सदृष्टान्तम् आह-

स्रक्-चन्दन-वधू-वस्त्र-सुवर्णादिषु पामरः ।

अप्रमत्तः यथा तद्वत् न प्रमाद्यति भोक्तरि ॥२०५॥

स्रक्चन्दनेति । पामरः पृथक् जनः स्रगादिविषये यथा अप्रमत्तः सावधानः भवति एवं मुमुक्षुः अपि आत्मविषये न प्रमाद्यत्यनवधानं न करोति किंतु तच्चिन्तयेव तिष्ठति इत्यर्थः ॥२०५॥

अनवधान-अभावम् एव बहुभिः दृष्टान्तैः स्पष्टयति-

काव्य-नाटक-तर्कादिम् अभ्यस्यति निरन्तरम् ।

विजिगीषुः यथा तद्वत् मुमुक्षुः स्वम् विचारयेत् ॥२०६ ॥

जाग्रत् स्वप्न सुषुप्ति आदि प्रपञ्चं यत् प्रकाशते ।

तत् ब्रह्म अहम् इति ज्ञात्वा सर्व बन्धैः प्रमुच्यते ॥ २१३ ॥

एकः एव आत्मा मन्तव्यः जाग्रत् स्वप्न सुषुप्तिषु ।

स्थान त्रय व्यतीतस्य पुनः जन्म न विद्यते ॥ २१४ ॥

त्रिषु धामसु यत् भोग्यं भोक्ता भोगः च यत् भवेत् ।

तेभ्यः विलक्शणः साक्शी चित् मात्रः अहं सदाशिवः ॥ २१५ ॥

एवं विवेचिते तत्त्वे विज्ञामय शब्दितः ।

चिदाभासः विकारी यः भोक्तृत्वं तस्य शिष्यते ॥ २१६ ॥

मायिकः अयं चिदाभासः श्रुतेः अनुभवात् अपि ।

इन्द्रजालं जगत् प्रोक्तं तत् अन्तःपाति अयं यतः ॥ २१७ ॥

विलयः अपि अस्य सुप्ति आदौ साक्शिणा हि अनुभूयते ।

एतत् दृशं स्वस्वभावं विविनक्ति पुनः पुनः ॥ २१८ ॥

विविच्य नाशं निश्चित्य पुनः भोगं न वाञ्छति ।

मुमुर्षुः शायितः भूमौ विवाहं कः अभिवाञ्छति ॥ २१९ ॥

जिह्वेति व्यवहर्तुं च भोक्ता अहम् इति पूर्ववत् ।

छिन्न नासः इव ह्रितः क्लिश्यन् आरब्धम् अश्नुते ॥ २२० ॥

यदा स्वस्य अपि भोक्तृत्वं मन्तुं जिह्वेति अयं तदा ।

साक्शिणि आरोपयेत् एतत् इति का एव कथा वृथा ॥ २२१ ॥

इति अभिप्रेत्य भोक्तारम् आक्शिपति अविशङ्क्या ।

कस्य कामाय इति ततः शरीर अनुज्वरः न हि ॥ २२२ ॥

स्थूलं सूक्श्मं कारणं च शरीरं त्रिविधं स्मृतम् ।

अवश्यं त्रिविधः अस्ति एव तत्र तत्र उचितः ज्वरः ॥ २२३ ॥

वात पित्त श्लेष्म जन्य व्याधयः कोटिशः तनौ ।

दुर्गन्धित्व कुरूपत्व दाह भङ्ग आदयः तथा ॥ २२४ ॥

काम क्रोध आदयः शान्ति दान्ति आद्याः लिङ्गदेहगाः ।

ज्वरा द्वये अपि बाधन्ते प्राप्त्या अप्राप्त्याः नरं क्रमात् ॥ २२५ ॥

स्वं परं च न वेत्ति आत्मा विनष्टः इव कारणे ।

आगामि दुःख बीजं च इति एतत् इन्द्रेण दर्शितम् ॥ २२६ ॥

एते ज्वराः शरीरेषु त्रिषु स्वाभाविकाः मताः ।

वियोगे तु ज्वरैः तानि शरीराणि एव नासते ॥ २२७ ॥

तन्तोः वियुज्येत पटः वालेभ्यः कम्बलः यथा ।

मृदः घटः तथा देहः ज्वरेभ्यः अपि इति दृश्यताम्॥ २२८॥

चिदाभासे स्वतः कः अपि ज्वरः न अस्ति यतः चितः।

प्रकाश एक स्वभावत्वम् एव दृष्टं न च इतरत्॥ २२९॥

चिदाभासे अपि असम्भाव्याः ज्वराः साक्शिणि का कथा।

एवम् अपि एकतां मेने चिदाभासः हि अविद्यया॥ २३०॥

साक्शिसत्यत्वम् अध्यस्य स्वेन उपेते वपुः त्रये।

तत् सर्वं वास्तवं स्वस्य स्वरूपम् इति मन्यते॥ २३१॥

एतस्मिन् भ्रान्तिकाले अयं शरीरेषु ज्वरत्सु अथ।

स्वयम् एव ज्वराम् इति मन्यते हि कुटुम्बिवत्॥ २३२॥

पुत्रदारेषु तप्यत्सु तपाम् इति वृथा यथा।

मन्यते पुरुषः तद्वत् आभासः अपि अभिमन्यते॥ २३३॥

विविच्य भ्रान्तिम् उज्झित्वा स्वम् अपि अगणयन् सदा।

चिन्तयन् सक्शिणं कस्मात् शरीरम् अनुसंज्वरेत्॥ २३४॥

अयथा वस्तु सर्प आदि ज्ञानं हेतुः पलायने।

रज्जु ज्ञाने अहिधीध्वस्तौ कृतम् अपि अनुशोचति॥ २३५॥

मिथ्या अभियोग दोषस्य प्रायश्चित्तत्व सिद्धये।

क्शमापयन् इव अत्मानं साक्शिणं शरणं गतः॥ २३६॥

आवृत्त पाप नुत्ति अर्थं स्नान आदि आवर्त्यते यथा ।

आवर्तयन् इव ध्यानं सदा साक्शि परायणः ॥ २३७ ॥

उपस्थ कुष्ठिनी वेश्या विलासेषु विलज्जते ।

जानतः अग्रे तथा आभासः स्वप्रख्यातौ विलज्जते ॥ २३८ ॥

गृहीतः ब्राह्मणः म्लेच्छैः प्रायश्चित्तं चरन् पुनः ।

म्लेच्छैः संकीर्यते न एव तथा आभासः शरीरकैः ॥ २३९ ॥

यौवराज्ये स्थितः राजपुत्रः साम्राज्यवंछया ।

राजानुकारी भवति तथा साक्शि अनुकारि अयम् ॥ २४० ॥

यः ब्रह्म वेद ब्रह्म एव भवति एव इति श्रुतिम् ।

श्रुत्वा तत् एकचित्तः सन् ब्रह्म वेत्ति न च इतरत् ॥ २४१ ॥

देवत्व कामा हि अग्नि आदौ प्रविशन्ति यथा तथा ।

साक्शित्वेन अवशेषाय स्वविनाशं स वाञ्छति ॥ २४२ ॥

ननु तत्त्वज्ञानेन आभासत्वं अपगच्छति चेत् कथं तत्त्वविदां जीवत्वव्यवहारः इत्याशङ्क्य प्रारब्धकर्मक्षयपर्यन्तं तदुपपत्तिं स दृष्टान्तमाह-

यावत् स्वदेहदाहं स नरत्वं न एव मुञ्चति ।

तावत् आरब्धदेहं स्यात् न आभासत्व विमोचनम् ॥ २४३ ॥

यावदिति। यथा अन्नादौ प्रविष्टः पुरुषः दाहादिना स्वदेहनाशपर्यन्तं नरत्वं नरव्यवहारयोग्यत्वं नैव मुञ्चति एवं प्रारब्धक्षयपर्यन्तं चिदाभासत्वव्यवहारः न निवर्ततेत्यर्थः ॥२४३॥

ननु भोक्तृत्वादि- भ्रमोपादानस्य अज्ञानस्य निवृत्तत्वात् कथं पुनः भोगानुवृत्तिः कथं वा मर्त्योऽहमिति विपरीतप्रतीतिः इत्याशङ्क्य दृष्टान्तप्रदर्शनेन एतत् संभावयति -

रज्जुज्ञाने अपि कम्प आदिः शनैः एव उपशाम्यति।

पुनः मन्द अन्धकारे सा रज्जुः क्विशप्त उरगी भवेत्॥ २४४॥

रज्जुज्ञान इति ॥२४४॥

दार्ष्टान्तिके योजयति-

एवम् आरब्धभोगः अपि शनैः शाम्यति नः हठात्।

भोगकाले कदाचित् तु मर्त्यः अहम् इति भासते॥ २४५॥

एवमिति। २४५॥

ननु पुनर्मर्त्यत्वबुद्ध्युदये तेन तत्त्वज्ञानं बाध्येतेत्याशङ्क्याह -

न एतावता अपराधेन तत्त्वज्ञानं विनश्यति।

जीवन्मुक्तिव्रतं न इदं किन्तु वस्तुस्थितिः खलु॥ २४६॥

नैतावतेति। कदाचिदहं मर्त्य इत्येवंविधज्ञानोदयमात्रेण आगमप्रमाणजनिततत्त्वज्ञानं न बाध्यते। कुत इत्यत आह- जीवन्मुक्तीति। इदं मर्त्यत्वबुद्ध्युपाकरणलक्षणं जीवन्मुक्तिव्रतं नियमेनानुष्ठेयं न भवति किंतु सम्यग्ज्ञानेन भ्रान्तिज्ञाननिवृत्तिरित्ययं वस्तुस्वभावः अतः कदाचिन्मर्त्यत्वबुद्ध्तुदयेऽपि पुनस्तत्त्वज्ञानानन्तरेण तस्या एव बाध्यत्वमिति भावः ॥२४६॥

भवतु रज्जुसर्पादिस्थले विपरीतज्ञाननिवृत्तावपि तत्कार्यकम्पाद्यनुवृत्तिः प्रकृतदृष्टान्ते दशमे दशमस्त्वमसि इति वाक्यविचारजन्यज्ञानेन भ्रमनिवृत्तो तत्कार्यानुवृत्तिर्नोपलभ्यत इत्याशङ्क्याह-

दशमः अपि शिरः ताडं रुदन् बुध्वा न रोदिति।

शिरोव्रणः तु मासेन शनैः शाम्यति नः तदा॥ २४७॥

दशमोऽपीति। दशमोऽस्मीति ज्ञानोदये सति शिरस्ताडनपूर्वकं रोदनमात्रं निवर्तते ताडनजन्यव्रणस्तु अनुवर्तत एषेत्यर्थः॥२४७॥

ननु ज्ञानोत्तरकालेऽपि संसारानुवृत्तौ जीवन्मुक्तेः कुतः पुरुषार्थतेत्याशङ्क्य मुक्तिलाभजन्यहर्षस्य तद्दुःखाच्छादकस्य सत्त्वात्पुरुषार्थतेति दृष्तान्तपूर्वकमाह-

दशम अमृतिलाभेन जातः हर्षः व्रणव्यथाम्।

तिरोधत्ते मुक्तिलाभः तथा प्रारब्धदुःखिताम्॥ २४८॥

दशमेति ॥२४८ ॥

जीवन्मुक्तिव्रतं नेदम्। प्र ७-१४६ इत्युक्तं तत्र व्रतत्वाभावे किमायातमित्यत आह -

व्रताभावात् यदा अध्यासः तदा भूयः विविच्यताम्।

रससेवी दिने भुङ्क्ते भूयः भूयः यथा तथा ॥ २४९ ॥

व्रताभावादिति। पुनः पुनर्विचारकरणे दृष्टान्तमाह - रससेवीति। यथा रससेवी नरः एकस्मिन्नेव दिने क्षुद्बाधापरिहाराय पुनः पुनर्भुङ्क्ते तद्वदध्यासनिवृत्तये पुनः पुनर्विवेकः क्रियतामित्यर्थः ॥२४९ ॥

ज्ञानेनानिवर्त्यस्य प्रारब्धकर्मफलस्य केन तर्हि निवृत्तिरित्याशङ्क्य ताडनजन्यव्रणस्य औषधेनैव भोगेनैव निवृत्तिरित्याह -

शमयति औषधेन अयं दशमः स्वं व्रणं यथा।

भोगेन शमयित्वा एतत् प्रारब्धं मुच्यते तथा ॥ २५० ॥

शमयतीति ॥२५० ॥

अन्यकल्पनयापि बाधोऽस्तीत्याशङ्क्य तदभावे दृष्टान्तमाह -

गुञ्जापुञ्जेति ॥२५९ ॥

ननु स्वदेहभरणार्थं भिक्षाहरणादिकं परलोकार्थस्नानादिकं च भवता क्रियमाणमुपलभ्यते अतोऽक्रियत्वमसिद्धमित्याशङ्क्य तदपि स्वदृष्ट्या नैवास्ति किंत्वन्यैरेव कल्पितमित्याह-

निद्रा भिक्शे स्नान शौचे न इच्छामि न करोमि च ।

द्रष्टारः चेत् कल्पयन्ति किम् मे स्यात् अन्यकल्पनात् ॥ २५८ ॥

निद्रेति ॥२५८ ॥

ननु स्वार्थप्रवृत्त्यभावेऽपि परार्थप्रवृत्तिः किं न स्यादित्याशङ्क्याधिकाराभावात् साऽपि नास्तीत्याह-

व्याचक्शतां ते शास्त्राणि वेदान् अध्यापयन्तु वा ।

ये अत्र अधिकारिणः मे तु न अधिकारः अक्रियत्वतः ॥ २५७ ॥

व्याचक्षतामिति ॥२५७ ॥

स्वर्गाद्यर्थं कर्मानुष्ठातृभ्यो वैलक्षण्यमाह-

अनुतिष्ठन्तु कर्माणि परलोकायियासवः ।

सर्वलोकात्मकः कस्मात् अनुतिष्ठामि किं कथम् ॥ २५६ ॥

अनुतिष्ठन्त्विति ॥२५६ ॥

तदेवानुसन्धानं प्रपञ्चयति-

दुःखिनोऽज्ञा इत्यादिना । कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः प्र १४-५८

इत्यतः प्राक्तनेन ग्रन्थेन। तत्र तावदैहिकसुखार्थिभ्यो वैलक्षण्यं स्वस्य दर्शयति-

दुःखिनः अज्ञाः संसरन्तु कामं पुत्र आदि अपेक्शया।

परमानन्द पूर्णः अहं संसरामि किम् इच्छया॥ २५५॥

दुःखिन इति॥२५५॥

एवं कृतकृत्यत्वमुपपाद्य तत्फलभूतां तृप्तिं दर्शयति-

तत् एतत् कृत कृत्यत्वं प्रतियोगिपुरःसरम्।

अनुसन्दधात् एव अयम् एवं तृप्यति नित्यशः॥ २५४॥

तदेतदिति। प्रतियोगिपुरःसरं प्रतियोग्यनुसंधानपूर्वकं यथा भवति तथा एवं वक्ष्यमाणप्रकारेण सर्वदा तुष्यति॥२५४॥

कृतकृत्यत्वमेवोपपादयति-

ऐहिक अमुष्मिक व्रात सिद्धै मुक्तेः च सिद्धये।

बहु कृत्यं पुरास्य अभूत् तत् सर्वम् अधुना कृतम्॥ २५३॥

ऐहिकेति। अस्य विदुषस्तत्त्वज्ञानोदयात्पूर्वमिह लोके इष्टप्राप्तये अनिष्टनिवृत्तये च कृषिवाणिज्यादिकं स्वर्गादिसिद्धये योगोपासनादिकं मोक्षसाधनज्ञानसिद्धये श्रवणादिकं चेति बहुविधं कर्तव्यमासीत्। इदानीं तु सांसारिकफलेच्छाभावाद्ब्रह्मानन्दसाक्षात्कारस्य सिद्धत्त्वाच्च तत्सर्वं

कृषियागश्रवणादिकं कृतं कृतप्रायमभूत् अतःपपमनुष्ठेयत्वाभावादित्यर्थः ॥२५३॥

अपरोक्षज्ञानजन्यायास्तृप्तेर्निरङ्कुशत्वं प्रतियोगिप्रदर्शनपुरःसरं प्रतिजानीते - साङ्कुशेति। विषयलाभजन्यायास्तृप्तेर्विषयान्तरकामनया कुण्ठितत्वात्साङ्कुशत्वं अन्यास्तु तदभावान्निरङ्कुशत्वम्। तदेव दर्शयति- कृतमिति ॥२५२॥

अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे अवस्थे जीवगे ब्रूते आत्मानं चेत् बृ ४-४-१२ इति श्रुतिरित्यनेन श्लोकेन। आत्मानं चेद्विजानीयादयमस्मीति पूरुष। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् बृ ४-४-१२ इत्यस्मिन्मन्त्रे परोक्षज्ञानशोकनिवृत्त्याख्ये जीवावस्थे द्वे अभिहिते इत्युक्तम् इदानीं तदभिधानसूचितां जीवस्य सप्तमीं तृप्तिलक्षणामवस्थां वृत्तनुकीर्तनपूर्वकं वक्तुमारभते-

किम् इच्छन् इति वाक्य उक्तः शोक मोक्श उदीरितः।
आभासस्य हि अवस्था एषा षष्ठी तृप्तिः तु सप्तामि ॥ २५१ ॥

किमिच्छन्निति। किमिच्छन् इत्युत्तरार्धेनाभिहितो यः शोकमोक्षः स एतावता ग्रन्थसन्दर्भेणोदीरितोऽभिहितः। एषा अज्ञानमावृत्तिस्तद्वद्विक्षेपश्च परोक्षधीः। आभासस्येति। सप्तमी व्याख्यायत इति शेषः ॥२५१॥

अपरोक्षमतिः शोकमोक्षस्तृप्तिनिरङ्कुशा प्र ७-३३ इत्यनेन श्लोकेनाभिहितासु सप्तसु जीवावस्थासु षष्ठीत्याह -

अन्यकल्पनयापि बाधोऽस्तीत्याशङ्क्य तदभावे दृष्टान्तमाह -

गुञ्जापुञ्जादि दह्येत न अन्य आरोपित वह्निना ।

न अन्य आरोपित संसारधर्मान् एवम् अहं भजे ॥ २५९ ॥

गुञ्जा-पुञ्जा इति ॥२५९ ॥

ननु फलान्तर-इच्छा-अभावे कर्मानुष्ठानं मा भूत् तत्त्व-साक्षात्काराय श्रवणादिकं कर्तव्यम् एव इति आशङ्क्य अज्ञानादि-अभाववत् श्रवणादि-कर्तृत्वम् अपि न अस्ति इति आह -

शृण्वन्तु अज्ञात-तत्त्वास्ते जानन् कस्मात् शृणोमि अहम् ।

मन्यन्तां संशयापन्ना न मन्ये अहम् असंशयः ॥२६० ॥

शृण्वन्तु इति । अज्ञात-तत्त्वाः अज्ञातं ब्रह्मात्मैकत्व-लक्षणं तत्त्वं यैः ते तथाभूताः श्रवणं कुर्वन्तु ।तत्त्वं इत्थम् अन्यथा वा इति संशयवन्तः मननं कुर्वन्तु मम तत्-उभय-अभावात् न उभयत्र प्रवृत्तिः इति अर्थः ॥२६० ॥

मा भूतां श्रवण-मनने विपर्यय-निरासार्थं निदिध्यासनं कर्तव्यम् इति आशङ्क्य देहात् अवात्मबुद्धि-लक्षणस्य विपर्ययस्य अभावात् तदपि न अनुष्ठेयं इति आह-

विपर्यस्तः निदिध्यासेत् किम् ध्यानम् अविपर्ययात् ।

देहात्मत्व-विपर्यासं न कदाचित् भजामि अहम् ॥२६१ ॥

विपर्यस्त इति ॥ ।२६१ ॥

ननु विपर्यायां अभावे अहं मनुष्य इति व्यवहारः कथं घटत इति आशङ्क्य वासनावशात् भवति इति आह-

अहं मनुष्य इत्यादि व्यवहारः विना अपि अमुम् ।

विपर्यासं चिर-अभ्यस्त-वासनात्-अवकल्पते ॥२६२ ॥

अहम् इति ॥२६२ ॥

तर्हि अस्य व्यवहारस्य निवृत्ति-सिद्धये ध्यानं संपाद्यम् इति आशङ्क्य प्रारब्ध-क्षयम् अन्तरेण अस्य निवृत्तिः न अस्ति इति आह -

प्रारब्ध-कर्मणि क्षीणे व्यवहारो निवर्तते ।

कर्माक्षये त्वसौ नैव शाम्येत् ध्यान-सहस्रतः ॥२६३ ॥

प्रारब्ध इति ॥२६३ ॥

ननु प्रारब्ध-निमित्तकस्य अपि व्यवहारस्य विरलत्वाय ध्यानं कर्तव्यम् एव इति आशङ्क्य व्यवहारस्य अबाधकत्व-दर्शनात् तन्निवृत्तये ध्यानम् अननुष्ठेयम् इति आह -

विरलत्वं व्यवहृतेः इष्टं चेत् ध्यानम् अस्तु ते ।

आबाधिकां व्यवहृतिं पश्यन् ध्यायामि अहं कुतः ॥२६४ ॥

विरलत्वम् इति ॥२६४ ॥

ध्यानस्य अकर्तव्यत्वे अपि विक्षेप-परिहाराय समाधिः कर्तव्यः इति आशङ्क्य विक्षेप-समाधौ अनयोः मनोधर्मत्वात् न विक्षेप-निवारके अपि समाधौ मम अधिकारः इति आह-

विक्षेपो नास्ति यस्मात् मे न समाधिस्ततो मम ।

विक्षेपो वा समाधिर्वा मनसः स्यात् विकारिणः ॥२६५ ॥

विक्षेप इति ॥२६५ ॥

ननु तथापि समाधि-फलम् अनुभवः संपादनीय इति आशङ्क्य तस्य मत्-स्वरूपत्वात् न संपाद्यत इति आह -

नित्य-अनुभव-रूपस्य को मे वा अनुभवः पृथक् ।

कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः ॥२६६ ॥ ।

नित्य इति । उपपादितं कृतकृत्यत्वं निगमयति -कृतं कृत्यम् इति ।२६६ ॥

एवं सर्वत्र कर्तृत्व-अनभ्युपगमे अनियत-वृत्तित्वं प्रसज्येत इति आशङ्क्य प्रारब्धवशात् प्राप्तम् अनियतवृत्तित्वं अङ्गीकरोति -

व्यवहारो लौकिको वा शास्त्रीयो वा अन्यथा अपि वा ।

मम अकर्तुरलेपस्य यथारब्धं प्रवर्तताम् ॥२६७ ॥

व्यवहार इति। लौकिकः भिक्षाहारादिः शास्त्रीयः जप-समाध्यादिः अन्यथा अपि वा प्रतिषिद्ध-हिंसादिः वा व्यवहारः कर्तृत्व-भोक्तृत्व-रहितस्य मम प्रारब्धं कर्म अनतिक्रम्य प्रवर्तताम् इति अर्थः ॥२६७॥

एवं वस्तु-तत्त्वम् अभिधाय प्रौढवादेन आह -

अथवा कृतकृत्योऽपि लोकानुग्रह-काम्यया।
शास्त्रीयेण एव मार्गेण वर्तेऽहं का मम क्षतिः ॥२६८॥

अथवा इति। लोक-अनुग्रह-काम्यया प्राणि-अनुग्रहेच्छया इति अर्थः ॥२६८॥

शास्त्रीय एव मार्गे प्रवर्तन-आङ्गीकारे तर्हि तत्-अभिमान-प्रयुक्तः विकारः स्यात् इति आशङ्क्य आह -

देवार्चन-स्नान-शौच-भिक्षादौ वर्ततां वपुः।
तारं जपतु वाक् तद्वत् पठतु आम्नाय-मस्तकम् ॥२६९॥
विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानन्दे विलीयताम्।
साक्षी अहं किंचिदप्यत्र न कुर्वे नापि कारये ॥२७०॥

देवार्चनेत्यादिना श्लोकद्वयेन। तारं प्रणवम्। आम्नायमस्तकं वेदान्त-शास्त्रम् ॥२६९-२७०॥

फलितम् आह-

एवं च कलहः कुत्र संभवेत् कर्मिणो मम।

विभिन्न-विषयत्वेन पूर्वापर-समुद्रवत् ॥२७१ ॥

एवं च इति ॥२७१ ॥

विभिन्न विषयत्वम् एव स्पष्टयति -

वपुर्वाग्-धीषु निर्बन्धः कर्मिणो न तु साक्षिणि ।

ज्ञानिनः साक्षि-अलेपत्वे निर्बन्धो न इतरत्र हि ॥२७२ ॥

वपुः इति ॥२७२ ॥

अथ अपि यः ज्ञानि-कर्मिणौ कलहं कुर्वाते तौ विद्वद्भिः परिहसनीयौ इति आह-

एवं च अन्योन्य-वृत्तान्तान् अभिज्ञौ बधिरौ इव ।

विवदेतां बुद्धिमन्तः हसन्त्येव विलोक्य तौ ॥ ।२७३ ॥

एवं च इति ॥२७३ ॥

कुतः परिहास्यत्वम् इति आशङ्क्य निर्विषय-कलह-कारित्वात् इति आह -

यं कर्मी न विजानाति साक्षिणं तस्य तत्त्ववित् ।

ब्रह्मत्वं बुध्यतां तत्र कर्मिणः किं विहीयते ॥२७४ ॥

यं इति । कर्मी यं साक्षिणं कर्म-अनुष्ठान-उपयोगि-देह-वाक्-बुद्धि-अतिरिक्तं प्रत्यग्-आत्मानं न विजानाति तत्त्वविदा तस्य ब्रह्मत्वे बुद्धे कर्मिणः कर्मानुष्ठाने किं हीयते ॥२७४ ॥

देह-वाग्-बुद्धयस्त्यक्ता ज्ञानिना अनृत-बुद्धितः ।

कर्मी प्रवर्तयतु आभिः ज्ञानिनः हीयते अत्र किम् ॥२७५॥

देह इति । ज्ञानिना मिथ्यात्व-बुद्धया परित्यक्ताभिः देह-वाक्-बुद्धिभिः कर्मानुष्ठाने ज्ञानिनः वा किं हीयते । अतः निर्विषय-कलह-कारिणोः परिहसनीयत्वम् इति अर्थः ॥२७५॥

कर्मानुष्ठानं प्रयोजन-शून्यत्वात् न ज्ञानिना अभ्युपगम्यत इति शङ्कते-

प्रवृत्तिर्नोपयुक्ता चेत् निवृत्तिः क्व उपयुज्यते ।

बोध-हेतुः निवृत्तिः चेत् बुभुत्सायां तथा इतरा ॥२७६॥

प्रवृत्तिः इति । उपभोग-अभावः निवृत्तौ अपि समान इति परिहरति - निवृत्तिः इति । निवृत्तेः बोध-हेतुत्वात् न उपयोग-अभाव इति शङ्कते - बोध इति । तर्हि प्रवृत्तिः अपि बुभुत्सा-हेतुत्वात् उपयोगवतीत्याह - बुभुत्सा इति ॥२७६॥

ननु बुद्धस्य बुभुत्सा-अभावात् प्रवृत्तेः अनुपयोगित्वम् इति पुनः शङ्कते -

बुद्धः चेत् न बुभुत्सेत नापि असौ बुध्यते पुनः ।

अबाधात् अनुवर्तेत बोधो न तु अन्य-साधनात् ॥२७७॥

बुद्धः चेत् इति । तर्हि बुद्धस्य पुनः बोध-अभावात् तत्-हेतु-निवृत्तिः अपि बुद्धं प्रत्यनुपयोगिनी इति आह - न अपि इति । सकृत्-जातस्य बोधस्य स्थिरत्वाय निवृत्तिः अपेक्ष्यत इति आशङ्क्य स्थिरत्वं बाधक-अभावम् अपेक्षते न

साधनान्तरम् इति आह - अबाधात् इति। वाक्य-प्रमाण-जन्य-ज्ञानस्य बलवता प्रमाणेन बाध-अभावात् अनुवृत्तिः स्यात् एव अतः न साधनान्तरं तदर्थम् अनुष्ठेयम् इति अर्थः ॥२७७॥

ननु प्रमाणान्तरेण अबाधे अपि अविद्यया तत्कार्येण कर्तृत्व-अध्यासेन वा बाधः स्यात् इति आशङ्क्य आह -

न अविद्या न अपि तत्कार्यं बोधं बाधितुम् अर्हति।
पुरा एव तत्त्व-बोधेन बाधिते ते उभे यतः ॥२७८॥

न अविद्या इति। तत्र हेतुम् आह - पुरा एव इति ॥२७८॥

ननु अविद्याया बाधितत्वे अपि तत्कार्यस्य प्रतीयमानस्य बाधितत्व-असंभवात् तेन बोधस्य बाधः भवेत् इति आशङ्क्य उपादान-निवृत्त्या एव तस्य अपि बाधितत्वात् न तेन अपि बाधः शङ्कितुं शक्यत इति आह -

बाधितं दृश्यतां अक्षैः तेन बाधः न शक्यते।
जीवन् आखुः न मार्जारं हन्ति हन्यात् कथं मृतः ॥२७९॥

बाधितम् इति। तत्र दृष्टान्तम् आह-जीवन् इति। आखुः मूषकः ॥२७९॥

द्वैतदर्शनेन तत्त्वबोधस्य बाध-अभावं कैमुतिक-न्याय-प्रदर्शनेन द्रढयितुं तदनुकूलं दृष्टानतम् आह-

अपि पाशुपतास्त्रेण विद्धः चेत् न ममार यः।

निष्फलेषु वितुन्नाङ्गः नङ्क्ष्यति इति का प्रमा ॥२८०॥

अपि इति ।यः समर्थः पाशुपतास्त्रेण विद्धः अपि न ममार चेत् किल सः निष्फलेषु वितुन्नाङ्गः शल्यरहितेषुणा व्यथितदेहः सन् नङ्क्ष्यति नाशं प्राप्स्यति इति अत्र का प्रमा ।प्रमाणं न अस्ति इति अर्थः ॥२८०॥

दृष्टान्त सिद्धं अर्थं दार्ष्टान्तिके योजयति-

आदौ अविद्यया चित्रैः स्वकार्यैः जृम्भमाणया ।
युद्ध्वा बोधोऽजयत्सोऽद्य सुदृढो बाध्यतां कथम् ॥२८१॥

आदौ इति । आदौ विद्याभ्यास-समये चित्रैः बहुविधैः तत्कार्यैः प्रमातृत्व-भोक्तृत्व-कर्तृत्वादिभिः जृम्भमाणया विवर्धमानया अविद्यया बोधः युद्धवा युद्धं कृत्वा ताम् अजयत् सः एव अभ्यासपाटवेन सुदृढः अद्य इदानीं अविद्या-निवृत्तौ सत्यं निर्मलेन तत्कार्येण अध्यासेन कथं बाध्यताम् । न कथम् अपि बाध्येत इति अर्थः ॥२८१॥

उपपादितम् अर्थं श्रोतृ-बुद्धारोहाय रूपकेण आह-

तिष्ठन्तु अज्ञान-तत्कार्यशवा ओघेन मारिताः ।
न भीतिः बोधसम्राजः कीर्तिः प्रत्युत तस्य तैः ॥२८२॥

तिष्ठन्तु इति ॥२८२॥

भवतु एवं प्रकृते किं आयातं इत्यत आह-

यः एवम् अतिशूरेण बोधेन न वियुज्यते ।

प्रवृत्त्या वा निवृत्त्या वा देहादिगतयास्य किं ॥२८३॥

य इति । यः पुमान् एवं उक्त-प्रकारेण अतिशूरेण अविद्या-तत्कार्य-घातकेन बोधेन ब्रह्मात्मैकत्व-ज्ञानेन न वियुज्यते न कदापि वियुक्तः भवति । अस्य पुंसः देहादिनिष्ठया प्रवृत्त्या निवृत्त्या वा किम् । न किमपि इष्टम् अनिष्टम् वा इति अर्थः ॥२८३॥

तर्हि ज्ञानिवत् अज्ञानिनः अपि प्रवृत्तौ अग्रहः न युक्त इति आशङ्क्य आह-

प्रवृत्तौ अग्रहः न्याय्यः बोधहीनस्य सर्वथा ।

स्वर्गाय वा अपवर्गाय यतितव्यं यतः नृभिः ॥२८४॥

प्रवृत्तौ इति ।तत्र उपपत्तिम् आह-स्वर्गाय इति ॥२८४॥

विदुषः आग्रहः न युक्त इति उक्तं तर्हि कर्मिणां मध्ये वर्तमानेन तेन किं कर्तव्यं इति आह-

विद्वान् चेत् तादृशां मध्ये तिष्ठेत् तदनुरोधतः ।

कायेन मनसा वाचा करोति एव अखिलाः क्रियाः ॥२८५॥

विद्वान् चेत् इति ।विद्वान् तादृशां कर्मिणां मध्ये तिष्ठेत् चेत् तदनुरोधतः तेषाम् अनुसारेण शरीरादिभिः सर्वाः क्रियाः करोति एव न तान् कर्मिणः निवारयेत् इति अर्थः ॥२८५॥

अस्य एव तत्त्व-बुभुत्सूनां मध्ये अवस्थितस्य कृत्यम् आह-

एष मध्ये बुभुत्सूनां यदा तिष्ठेत् तदा पुनः ।

बोधाय एषां क्रियाः सर्वा दूषयन् त्यजतु स्वयम् ॥२८६॥

एष इति ।एष विद्वान् बुभुत्सूनां मध्ये यदा तिष्ठेत् तदा एषां बुभुत्सूनां बोधाय तत्त्व-ज्ञान-जननाय ताः क्रियाः दूषयन् स्वयमपि त्यजतु ॥२८६॥

द्वैतदर्शनेन तत्त्वबोधस्य बाध-अभावं कैमुतिक-न्याय-प्रदर्शनेन द्रढयितुं तदनुकूलं दृष्टान्तम् आह -

अपि पाशुपतास्त्रेण विद्धः चेत् न ममार यः ।

निष्फल-इषु-वितुन्नाङ्गः नङ्क्ष्यति इति का प्रमा ॥२८०॥

अपि इति । यः समर्थः पाशुपतास्त्रेण विद्धः अपि न ममार चेत् किल सः निष्फलेषु-वितुन्नाङ्गः शल्यरहितेषुणा व्यथितदेहः सन् नङ्क्ष्यति नाशं प्राप्स्यति इति अत्र का प्रमा । प्रमाणं न अस्ति इति अर्थः ॥२८०॥

दृष्टान्त सिद्धम् अर्थं दार्ष्टान्तिके योजयति -

आदौ अविद्यया चित्रैः स्वकार्यैः जृम्भमाणया ।

युद्ध्वा बोधोऽजयत् सोऽद्य सुदृढो बाध्यतां कथम् ॥२८१॥

आदौ इति । आदौ विद्याभ्यास-समये चित्रैः बहुविधैः तत्कार्यैः प्रमातृत्व-भोक्तृत्व-कर्तृत्वादिभिः जृम्भमाणया विवर्धमानया अविद्यया बोधः युद्धवा युद्धं

कृत्वा ताम् अजयत् सः एव अभ्यासपाटवेन सुदृढः अद्य इदानीम् अविद्या-निवृत्तौ सत्यां निर्मलेन तत्कार्येण अध्यासेन कथं बाध्यताम्। न कथम् अपि बाध्येत इति अर्थः ॥२८१॥

उपपादितम् अर्थं श्रोतृ-बुद्धारोहाय रूपकेण आह -

तिष्ठन्तु अज्ञान-तत्कार्यशवा बोधेन मारिताः।
न भीतिः बोधसम्राजः कीर्तिः प्रत्युत तस्य तैः ॥२८२॥

तिष्ठन्तु इति ॥२८२॥

भवतु एवं प्रकृते किं आयातं इत्यत आह-

यः एवम् अतिशूरेण बोधेन न वियुज्यते।
प्रवृत्त्या वा निवृत्त्या वा देहादिगतयास्य किम् ॥२८३॥

य इति। यः पुमान् एवम् उक्त-प्रकारेण अतिशूरेण अविद्या-तत्कार्य-घातकेन बोधेन ब्रह्मात्मैकत्व-ज्ञानेन न वियुज्यते न कदापि वियुक्तः भवति। अस्य पुंसः देहादिनिष्ठया प्रवृत्त्या निवृत्त्या वा किम्। न किमपि इष्टम् अनिष्टम् वा इति अर्थः ॥२८३॥

तर्हि ज्ञानिवत् अज्ञानिनः अपि प्रवृत्तौ आग्रहः न युक्त इति आशङ्क्य आह -

प्रवृत्तौ आग्रहः न्याय्यः बोधहीनस्य सर्वथा।
स्वर्गाय वा अपवर्गाय यतितव्यं यतो नृभिः ॥२८४॥

प्रवृत्तौ इति। तत्र उपपत्तिम् आह - स्वर्गाय इति ॥२८४॥

विदुषः आग्रहः न युक्त इति उक्तं तर्हि कर्मिणां मध्ये वर्तमानेन तेन किं कर्तव्यम् इति आह -

विद्वान् चेत् तादृशां मध्ये तिष्ठेत् तदनुरोधतः।
कायेन मनसा वाचा करोति एव अखिलाः क्रियाः ॥२८५॥

विद्वान् चेत् इति। विद्वान् तादृशां कर्मिणां मध्ये तिष्ठेत् चेत् तदनुरोधतः तेषाम् अनुसारेण शरीरादिभिः सर्वाः क्रियाः करोति एव न तान् कर्मिणः निवारयेत् इति अर्थः ॥२८५॥

अस्य एव तत्त्व-बुभुत्सूनां मध्ये अवस्थितस्य कृत्यम् आह -

एष मध्ये बुभुत्सूनां यदा तिष्ठेत् तदा पुनः।
बोधाय एषां क्रियाः सर्वा दूषयन् त्यजतु स्वयम् ॥२८६॥

एष इति। एष विद्वान् बुभुत्सूनां मध्ये यदा तिष्ठेत् तदा एषां बुभुत्सूनां बोधाय तत्त्व-ज्ञान-जननाय ताः क्रियाः दूषयन् स्वयमपि त्यजतु ॥२८६॥

कुत एव कर्तव्यं इति आह -

अविद्वत्- अनुसारेण वृत्तिः बुद्धस्य युज्यते।
स्तनन्धयानुसारेण वर्तते तत्पिता यतः ॥२८७॥

अविद्वत् इति । अज्ञान-अनुसारेण ज्ञानिनः वर्तनं उचितम् कृपालुत्वात् तेषां
अनुकम्पनीयत्वात् च इति भावः ।एवं क्व दृष्टं इति अत आह-
स्तनन्धयेति ।स्तनन्धयाः स्तनपानकर्तारः शिशवः इत्यर्थः ॥२८७ ॥
पितुः स्तनन्धय-अनुसारित्वं एव दर्शयति-
अधिक्षिप्तः ताडितः वा बलेन स्वपिता तदा ।
न क्लिश्नाति न कुप्येत बालं प्रत्युत लालयेत् ॥२८८ ॥
अधिक्षिप्त इति ॥२८८ ॥
दार्ष्टान्तिके योजयति-
निन्दितः स्तूयमानः वा विद्वान् अज्ञैः न निन्दति ।
न स्तौति किंतु तेषां स्यात् यथा बोधः तथा आचरेत् ॥२८९ ॥
निन्दित इति । विद्वान् अज्ञैःनिन्दितः स्तूयमानः वा स्वयं न निन्दति न स्तौति
किंतु एषां अज्ञानां यथा बोधं उपजायते तथा आचरेत् ॥२८९ ॥
एवं आचरेण निमित्तम् आह-
येन अयं नटनेन अत्र बुध्यते कर्यम् एव तत् ।
अज्ञ-प्रबोधात् न एव अन्यत् कार्यं अस्ति अत्र तद्विदः ॥२९० ॥
येन इति । अयं अज्ञानी अत्र अस्मिन् लोके विदुषः येन यादृशेन नटनेन
आचरणेन बुध्यते तत्त्वं अवगच्छति तेन कर्तव्यं एव ।तर्हि तद्वत् एव कार्यान्तरं

अपि प्रसज्येत इति अत आह-अज्ञ इति ।यतः तद्विदः तत्त्वविदः अत्र लोके अज्ञप्रबोधात् अन्यत् कर्तव्यं न एव अस्ति अतः तदनुसरणेन तत्त्वप्रबोधनं कर्तव्यम् इति अर्थः ॥२९० ॥

वृत्त-वर्तिष्यमाणयोः तात्पर्यम् आह-

कृतकृत्यतया तृप्तः प्राप्त-प्राप्यतया पुनः ।
तृप्यन् एवं स्वमनसा मन्यते असौ निरन्तरम् ॥२९१ ॥

कृतकृत्य इति । असौ विद्वान् पूर्वोक्त-प्रकारेण कृतकृत्यतया कृतं कृत्यजातं येन असौ कृतकृत्यः तस्य भावस्तत्ता तया तृप्तः सन् वक्ष्यमाण-प्रकारेण प्राप्त-प्राप्यतया प्राप्तं प्राप्यं येन सः प्राप्तप्राप्यः तस्य भावस्तत्ता तया तृप्यन् तृप्तः भवन् स्वमनसा निरन्तरम् एव मन्यते ॥२९१ ॥

किं मन्यते इति अत आह-

धन्योऽहं धन्योऽहं नित्यं स्वात्मानम् अञ्जसा वेद्मि ।
धन्योऽहं धन्योऽहं ब्रह्मानन्दः विभाति मे स्पष्टम् ॥२९२ ॥

धन्योऽहं धन्योऽहं इत्यादिना । धन्यः कृतार्थः । आदरार्थे वीप्सा । नित्यं अनवरतं स्वात्मानं स्वस्य निजं रूपं देशादि-अनवच्छिन्नं प्रत्यगात्मानं अञ्जसा साक्षाद्यतः वेद्मि जानाम्यतः धन्यः ।एवं आत्मज्ञान-लाभ-निमित्तां तुष्टिं अभिधाय तत्-फल-लाभ-निमित्तां तां दर्शयति-धन्य इति । ब्रह्मानन्दः

ब्रह्मभूतानन्दः मे स्पष्टं विभाति स्पष्टं यथा भवति तथा स्फुरति इति अर्थः ॥२९२॥

एवं इष्टप्राप्तौ तुष्टिं अभिधाय-अनिष्ट-निवृत्तौ अपि तुष्यति इति आह-

धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्षे अद्य।
धन्योऽहं धन्योऽहं स्वस्य अज्ञानं पलायितं क्वापि ॥२९३॥

धन्योऽहं इति। अद्य इदानीं दुःखं दुःखस्वरूपं संसारं न वीक्षे न पश्यामि अतः कृतार्थ इति अर्थः दुःखाप्रतीतौ कारणं आह- धन्योऽहं इति। अनेक-कर्म-वासनाजालं अज्ञानं क्वापि पलायितं नष्टं इति अर्थः ॥२९३॥

अज्ञान-निवृत्ति-फलं कृतकृत्यत्वं प्राप्तप्राप्यत्वं न दर्शयति-

धन्योऽहं धन्योऽहं कर्तव्यं मे न विद्यते किंचित्।
धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वं अद्य संपन्नम् ॥२९४॥

धन्य इति ॥२९४॥

इदानीं कृतकृत्यतया प्र ७।२९१ इत्यादिना जातायाः तृप्तेः निरतिशयत्वं आह-

धन्योऽहं धन्योऽहं तृप्तेः मे कः उपमा भवेत् लोके।
धन्योऽहं धन्योऽहं धन्यो धन्यः पुनः पुनः धन्यः ॥२९५॥

धन्य इति। इतः परं वक्तव्य-अदर्शनात्-तुष्टिः एव परिस्फुरति इति दर्शयति-

धन्य इति ॥२९५॥

अस्य सर्वस्य कारणभूत-पुण्य-पुञ्ज-परिपाकं अनुस्मृत्य तुष्यति इति आह-

अहो पुण्यं अहो पुण्यं फलितं फलितं दृढम्।

अस्य पुण्यस्य सम्पत्तेः अहो वयं अहो वयम्॥२९६॥

अहो पुण्यम् इति। एवंविध-पुण्य-सम्पादकं आत्मानं अनुस्मृत्य तुष्यति-

अस्य इति॥२९६॥

इदानीं सम्यक्-ज्ञान-साधनं शास्त्रं तदुपदेष्टारं आचार्यं अनुस्मृत्य तुष्यति-

अहो शास्त्रं अहो शास्त्रं अहो गुरुः अहो गुरुः।

अहो ज्ञानं अहो ज्ञानं अहो सुखं अहो सुखम्॥२९७॥

अहो शास्त्रं इति।पुनः च शास्त्रजन्यं ज्ञानं तत्सुखं च अनुस्मृत्य संतुष्यति-

अहो ज्ञानं इति॥२९७॥

ग्रन्थ-अभ्यासफलं आह-

तृप्तिदीपं इमं नित्यं ये अनुसंदधते बुधाः।

ब्रह्मानन्दे निमज्जन्तः ते तृप्यन्ति निरन्तरम्॥२९८॥

इति श्रीविद्यारण्य-कृत-पञ्चदश्यां तृप्तिदीपाख्यं प्रकरणं समाप्तम्।

तृप्तिदीपम् इति॥२९८॥

इति श्रीमत्परमहंस-परिव्राजकाचार्य-श्रीभारतीतीर्थविद्यारण्य-मुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विरचिता तृप्तिदीपव्याख्या समाप्ता॥